दैत्यस्य तत्रान्ये ये चासुराधिपाः शंबरोरिष्टनेमिश्च ये च त्रिपुरवासिनः ३२ ततो देवासुराः कृत्वा संविदं
कृतसौहृदाः उद्यमं परमं चक्रुरमृतार्थे परंतप ३३ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः नदं
त उदधिं निन्युः शक्ताः परिघबाहवः ३४ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः अपारयंतस्तं वोढुं ढुं
विवशा विजहुः पथि ३५ निपतन्स गिरिस्तत्र बहूनमरदानवान् चूर्णयामास महता भारेण क
नकाचलः ३६ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः
३७ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ३८
गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ३९ अवरोप्य गि
रिं स्कंधात्सुपर्णः पततां वरः ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ४० इति भागवते अष्टमे
षष्ठोध्यायः ६ शुक उवाच तेनागराजमामंत्र्य फलभागेन वासुकिं परिवीय गिरौ तस्मिन्नेत्रं
मुदान्विताः १ आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोभवन्

॥ २ ॥

सत्कृपया रुद्रः पपौ विषमितीर्यते फलभागेन तवाप्यमृतभागो भविष्यतीति संमंत्र्य वासुकिं नेत्रं गिरौ परिवीय
संवेष्ट्याब्धिं मथितुमारभिरे १ वासुकेर्मुखं तत्र दैत्यान्ग्राहयितुं पूर्वं हरिः पुरस्तान्मुखं जगृहे ततो भवन्
मुखं जगृहुः २ ॥

हृतोत्तरत्वस्थानविभागोयैः ८ दैवेन हेतुना स्वपौरुषेण हेसाति ० विघ्नेशस्य विधिं तेन रचितं विघ्नेशवि
नयः सत्याभिसंधिः संकल्पोयस्य ८ लक्ष्यो जनप्रस्तारोविस्तारोस्यास्तीति तथा तेन दृष्टेन २ तस्यारि
रेणवनेनं भ्रमणामंगलवं द्रूयनं मेने ९ अस्त्रैरेणस्वाकारेण दैवेन देवाकारेण रूपेण विशन् १० आत्म

तत्रैकं दैत्यपतयो महापुरुषवेष्टिते नगृहणीमोवयंपुंकं ग्रहोरंगममेगले २ स्वाध्यायज्ञान
संपन्नाः शत्वात्तात्मनवकर्मभिः इति स्तुत्वीस्थितां ईत्यादि लोकपुरुषोत्तमः स्वयमानो विस्ता
तात्रपुंकं तत्राहरसामरः हृतस्थानविभागास्तेयवकश्यपतेदनः ममेषुः परमायस्ताग्रपु
तांपयोनिधिं मध्यमानेत्रीवासहिरनाधारोह्यविशत् ध्रियमाणोपिवलिभिगौरवांणो
दुर्वदव ० तेस्तनिर्विण्णमनसः परिस्तानगुरुश्रियः ग्रासन्नूस्वपौरुषेण दैवेनातिबलीय
सा ८ विलोक्य विघ्नेशविधिं तदीयरोद्रं नवीर्योवितथाभिसंधिः हृतावशः काकपमहूते
महत्यविशुपतोयंगिरिमुज्जहार ९ नत्रस्थितेनवीदयाकुलावनेतेनः समस्थितातिमिश्रेन्स
गस्वरः दयारष्टेन सलक्ष्योजनाप्रस्तारिणा द्वीपइवापरोमहान् ० सएस्वरैदेजवीर्यवेपि
णनाविपन्दास्वरेण रूपेणतेषांवलवीर्यमीरयन् उद्दीपयंदेवगणांस्त्रविस्मेर्देवेननागेंद्रमबोध
दृपः उपर्यगेंद्रगिरिगांडिवान्यग्राक्रम्यहस्तेनसहस्रवाहुः तस्याधिविभ्रस्वभवंद्रमुखोरभिङ्
ध्रुवांत्रिनरसामदोत्कटामहाहिणादोभितनत्रचक्रे १३ ग्रहीद्रसाहस्रकठोरदंष्ट्रवेष्टासाग्नि
निर्देवदैत्यमायोयेगोत्रदारविरूपेणतेग्रभेयावोयरूपेणापरेणहरिणादोभितेनकानावक्रेसमूहोयस्मि
न १४ इत्यस्य श्लोकानित्रसासास्त्र ग्रहीद्रस्यसाहस्रंग्रपिरिशामिताः कठोरायप्रगाढयः तेभ्योनिर्गताभ्या
मग्निधूम्राभ्यामाहतेवर्धोयेयांतेसरलांडमविशोषाः १५ ॥
॥ ॥

श्रीः
भा० अ०
टी०
१५

देवांस्तु भगवद्वशा घनाः समभ्यवर्षन् समुद्रोर्मिभिरुपगूढा वायवश्च शीतला ववुः वांति स्म कथंभूतांस्तस्य श्वास
शिखोग्निभिर्हताः प्रभा येषां धूम्राण्येव वासांसि येषां १६ इतो द्वियेन मथ्नाद्रिभगवान्स्वयं पुरुषो शोभते इत्यन्वयः क
थंभूतः कनकपरिधिः पीतवासाः कर्णविद्योतमाना विद्युत्कुण्डललक्षणा यस्य सः तथा मूर्ध्नि भ्राजंतो विलुलि
ताः कचा यस्य सः तथा जैत्रैर्जिष्णुभिः दंदशूकं सर्पं प्रतिगिरिः प्रतिद्वंद्वी पर्वतः १८ हालाहलमिति आह्वा नाम यस्य

देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान् समभ्यवर्षन्भगवद्वशा घना ववुः स
मुद्रोर्म्युपगूढवायवः १६ मथ्यमानात्तदा सिन्धोर्देवासुरवरूथपैः यदा सुधा न जायेत निर्ममन्था
जितः स्वयं १७ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो
रक्तनेत्रः जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः
१८ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः संभ्रान्तमीनोन्मकराहिकच्छपा
त्तिमिद्विपग्राहतिमिंगिलाकुलात् १९ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति भी
ताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवं २० विलोक्य तं देववरं त्रिलोक्या भवाय
देव्याभिमतं मुनीनां आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः २१ प्रजापतयः
देवदेव महादेव भूतात्मन्भूतभावन त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् २२ त्वमेकः
सर्वजगत ईश्वरो बन्धमोक्षयोः तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् २३

संभ्रान्ता उन्नता मकरादयश्च यस्मिन् मत्स्यादिभिराकुलाच्च १९ तद्विषमप्रति अप्रतिसंप्रतिक्रियाशून्यं इतिवा
श्रुत उग्रो वेगो यस्य तदेवाह दिशि दिशीति सद्भाउग्रावेगाद्भीमाच क्ष्वेडादयो यस्मात् अतएवासह्यं विलोक्य
भीताः अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः २० त्रैलोक्या उद्भवाय देव्या सह अद्रौ कैलासे
आसीनं तथापि मुनीनां अभिमतं तेषामेवापवर्गाय तपो जुषाणं २१ निर्गुणं सगुणं चैव शिवं हरि पराक्रमैः
स्तुवंतस्त्व प्रपन्नानां नाम संतानवंतयोः २३

नन्वेवंभूते विश्वसृष्टिनिश्रसिद्धं तत्राह गुणमय्येति अस्य जगतो यदा सर्गादीन् धत्से तदा हे भूमन् स्वदृक्स्व
तः सिद्धज्ञानस्त्वं ब्रह्मादिसंज्ञां धत्से २३ तत्र हेतुः त्वं ब्रह्मेति सदसतोर्भावान्देवतिर्यगादिरूपान्भावय
तीति तथा सज्ज्ञानत्वद्व्यतिरिक्तेनास्तीत्याह आत्मैव त्वं नानाशक्तिभिः जगद्रूपेणाभातः यस्मादीश्वरः
स्वतः सिद्धज्ञानरूपया दृश्यतः जगदात्मना आत्मनः प्रकारमाह २५ त्वं शब्दस्य वेदस्य योनिः अतः स्वतः सि
द्धज्ञानः त्वं जगदादिर्महान् तत्त्वं आत्मा चाहंकारः कथंभूतः प्राणेन्द्रियद्रव्याणां कारणं भूतानां गुणा यस्य राजसादि
स्त्रिविधस्सर्गः स्वभावादयस्तु त्वमेव क्रतुः संकल्पः सत्यमृतं चेति यो धर्मः सत्यं महदादिरूपत्वे हेतुः त्रि

गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधां २३ त्वं
ब्रह्म परमं गुह्यं सदसद्भावभावनः नानाशक्तिभिराभातः त्वमात्मा जगदीश्वरः २४ त्वं शब्दयोनिर्ज
गदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः कालः क्रतुः सत्यमृतं च धर्मः त्वय्यक्षरं यत्त्रिवृदामनंति
२५ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपंकजं कालं गतिं तेऽखिलदेवतात्मनो
दिशश्च कर्णौ रसनं जलेशं २६ नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः पराव
रात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते २७ कुक्षिः समुद्रा गिरयोऽस्थिसंघा रोमाणि
सर्वौषधिवीरुधस्ते छंदांसि साक्षात्तव सप्त धातवः त्रयीमयात्मन् हृदयं सर्वधर्मः २८ मुखानि पंचोपनि
षदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः यत्तच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते २९

वृत्त्रिगुणात्मकं यदक्षरं प्रधानं त्वयि तदाश्रयं तदामनंति यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं अकार उकार मका
रित्यर्थः २६ अखिलदेवतात्माग्निः सर्वदेवता इति श्रुतेः सोऽग्निस्ते मुखं क्षितिं लोकभवं द्वितीयं तेषु विदुः दिशः
श्रवणं ते वरुणः २७ परेषु अवरेषु च ये आत्मनो जीवास्तेषामाश्रयणमाश्रयः तवात्मा अहंकारः २८ त्रयीमयात्मन्वे
दत्रयमूर्ते २८ पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्राः यैरष्टोत्तरत्रिंशन्मंत्राणां
वर्गः तेषामेव मंत्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्त्वं तत्त्वं कारणमित्यर्थः अवस्थितिः उपरतावस्था २९ ॥ ॥

श्री: भा· अ· टी· २८

यथर्मस्त्वामिंषुदंभलोभादिषु येत्वमिभिर्विसर्गः प्रतिसर्गः संहारः यज्ञाद्यैः मन्त्रादिभिर्विविधः सर्गः तानिनेत्र
त्रयं हे देव छन्दोमय ऋषिर्वेदः सतवेदार्थज्ञाणं आत्मात्मनतिपाठे मन्वेदः तमेवाह छन्दोमय इति ३० हे
गिरित्र तव परं ज्योतिरखिलानां लोकपालादीनामगम्यं न भवति कुतो यत्र रजआदिनास्ति किं तज्ज्योतिः यत्रि
रस्तभेदं ब्रह्म ३१ कामश्चाध्वरश्च इत्यादयः त्रिपुरादयः तथैव अनेकभूतद्रुहस्तान् क्षपयतः संहरतस्तेतत्कर्म
स्तुतये न भवति यमल्पमेतदित्यर्थः गरभक्षणमप्याश्चर्यं भावितेन मिह्वन्निर्देशः स्तुतये अलं न भवतीत्य

आयातवर्धर्मोसिषुयेविसर्गोनेत्रत्रयं सत्वरजस्तमांसि आत्मात्मनः प्राणकृतस्तवेदाच्छन्दोमयो
देवऋषिः पुराणः ३० न ते गिरित्राखिललोकपालविरिञ्चिवैकुण्ठसुरेन्द्रगम्यं ज्योतिः परं यत्र रज
स्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं ३१ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुत
येन तत्ते यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं न वेद ३२ ये त्वात्मरा
मगुरुभिर्हृदि चिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाभितप्तं कत्थन्त उग्रपरुषं निरतं श्मशाने ते
नूनमूतिमविदंस्तव हातलज्जाः ३३

अहेतुः यस्तु भवान् स्वनेत्रवह्निविस्फुलिङ्गशिखया इदं जगद्भसितं भस्मजातं न वेद नालोचयत्यपि ३२
तदेवं लिङ्गपराणां ग्रहस्याग्रेसो ये निंदन्ति ते तिमूर्खा इत्यर्थः ये तु मया सह चरन्तं स्यात् इति रात्रं कामिनं
स्त्रैणं कथंभूतं आत्मारामैः गुरुभिर्विश्वहितोपदेष्टारस्तैर्हृदि चिन्तितौ अङ्घ्रिद्वन्द्वं यस्य तथाभूतं अपि तपसाभि
तप्तं अपि ते नूनं तव ऊतिमविदन्निति काकुः तव लीलां नैव विदुरित्यर्थः अतो हातलज्जास्तपस्विनः कथमा
त्मारामैः सेवितचरणयुगलस्य कामित्वसंभवः कथं वा तपसाभितप्तस्य उग्रत्वेपरुषत्वे वा संभवतीत्य
विचार्यैव प्रलापादित्यर्थः ३३
त्सलयंति तथा श्मशाने च रंतं उग्रं क्रूरं परुषं च हिंसकं कथयंते

आत्मनो नावच्छिंदकानां कुतो महंतो नापि तत्वतो जानंतीत्यर्थः तत्तस्मात्तव स्वरूपस्य गमने ज्ञाने ब्रह्मादयोपि
नसमर्थाः संस्तवने तु कुतः अज्ञाः स्म तत्सर्गसर्गविषयाः कथं प्रभवाम यतस्तेषां सर्गे आत्मतत्वावच्छिन्नास्तथापि यदे
तत्सु वनेय तदात्मशक्तिपरिमितिमात्रमित्यर्थः तदेवाह एतत्परमिति ३४ तत्परं रूपं न यथापि त्वद्दर्शना
देवहृतार्थावयं इत्याह मृडनाय हीति ३५ तत्प्रभावमविचार्य विषपाने प्रवृत्तं मा कथं विदिदिषुव्यावारयदिति

तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ब्रह्मादयः किमुत संस्तवने वयं
तु तत्सर्गसर्गविषया अपि शक्तिमात्रं ३४ एतत्परं प्रपश्यामो न परं ते महेश्वर। मृडनाय हि लोक
स्य व्यक्तिस्तेव्यक्तकर्मणः ३५ शुक उवाच तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः सर्वभूतसु
हृद्देव इदमाह सतीं प्रियां ३६ अहो वत भवान्येतत्प्रजानां पश्य वैशसं क्षीरोदमथनोद्भूतात्का
लकूटादुपस्थितं ३७ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः बद्धवैरेषु भूतेषु मोहितेष्वा
त्ममायया ३८ आसां प्राणपरीप्सूनां विधेयमभयं हि मे एतावान् हि प्रभोरर्थो यद्दीनपरिपालनं ३९
पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः प्रीते हरौ भगवति प्रीयेहं सचराचरः ४० तस्मादिदं गरं
भुंजे प्रजानां स्वस्तिरस्तु मे एवमामंत्र्य भगवान्भवानीं विश्वभावनः ४१ तद्विषं जग्धुमारेभे प्रभा
वज्ञान्वमोदत ततः करतलीकृत्य व्यापि हालाहलं विषं ४२ अभक्षयन्महादेवः कृपया भूतभा
वनः तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ४३ यच्चकार गले नीलं तच्च साधोर्विभूषणं त
प्यंते लोकतापेन साधवः प्रायशो जनाः ४४ परमाराधनं तद्धि पुरुषस्याखिलात्मनः निशम्य कर्म त
च्छंभोर्देवदेवस्य मीढुषः ४५ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे प्रस्कन्नं पिबतः पाणेर्य

शंकया तामवत्तापयन्नाह अहो वतेति सार्धैस्त्रिभिर्वैशसं दुःखं प्राणेभ्यः कृतो नाशात्परत्राणे कृतो नामामया प्रभोः
समर्थस्यार्थः कार्यं किं बद्धवैरेषु भूतेषु परस्परं निर्वासत्र ३८ टीकां पूर्वं कृपयतः कृपां कुर्वतः पुंसः ४०
मेमन्नः शोभनो संज्ञास्वस्तिसुखेन जीवितमस्त्वित्यर्थः ४१ जग्धुं भक्षयितुं करतलीकृत्य करतलपरिमितमात्रं कृ
त्वा ४२ जलकल्मषः जलदोषोयस्मात्तद्गले नीलत्वं चकार साधोः कृपालोः ४४ प्रस्कन्नं गलितं ४५ ॥ ॥

श्री· भा·स्कं· टी· ८

अपरेवयेसविषाः तेपिजगृहुः अनेनविषस्यनीचगाऽज्ञा ४७ इतिश्रीभावार्थेअष्टमस्कंधेसप्तमोध्यायः ७
अष्टमेममहिमानेऽमौलक्ष्म्याविर्भावमाहनेसुरैः धन्वन्तरेरुत्तमेसोमेमोहिन्याइवईयने हविर्धानीसुरभिः १ देवया
नस्यअसलोकमार्गप्रापकस्ययज्ञस्यसंबंधिनेहविषे २ ईश्वराश्रितसयाप्रागेवहतेनयाचंद्रवर्णाउच्चैः ३ भगव
नःयःश्वेताद्रिःकैलासः तस्यमहिमानंदंतःश्रिवरतस्येहरन् ४ वल्गुभिर्गमनादिभिः स्वर्गिणांरतिकृन्मः
८ सदामापर्वतः तेनपवकस्यादिशिजानासौदामिनीस्यादिकादिमयिगिरिशृंगेषुथिकंविस्फुरंतीविद्युदि
वचस्विकाहिविशेषधानीदंदम्भूताम्रयोपरे ४७ इतिश्रीभागवतेअष्टमेसप्तमोध्यायः ७ शुक उ
वाच पीतेगरेवृषांकेनप्रीतास्तेमरदानवाः ममंथुस्तरसासिंधुंहविर्धानीततोभवत् १ तामग्नि
होत्रीमृषयोजगृहुर्ब्रह्मवादिनः यज्ञस्यदेवयानस्यमेध्यायहविषेनृप २ ततउच्चैःश्रवानामहयो
यो्भूच्चंद्रपांडुरः तस्मिन्बलिःस्पृहांचक्रेनेंद्रईश्वरशिक्षया ३ ततऐरावतोनामवारणेन्द्रोविनिर्ग
तः दंतैश्चतुर्भिःश्वेताद्रेर्हरन्भगवतोमहिं ततोभवत्पारिजातःसुरलोकविभूषणम् पूरयत्यर्थि
नोयोर्थैःशश्वद्भुवियथाभवान् ४ ततश्चाप्सरसोजातानिष्ककंठाःसुवाससः रमण्यःस्वर्गि
णांवल्गुगतिलीलावलोकनैः ५ ततश्चाविरभूत्साक्षाच्छ्रीरमाभगवत्परा रंजयंतीदिशःकां
त्याविद्युत्सौदामनीयथा ७ तस्यांचक्रुःस्पृहांसर्वेससुरासुरमानवाः रूपौदार्यवयोवर्णमहि
मादिप्तचेतसः ८ तस्याआसनमानिन्येमहेन्द्रोमहदद्भुतं मूर्तिमत्यःसरिच्छ्रेष्ठाहेमकुंभैर्जलंशु
चिः ९ आभिषेचनिकाभूमिराहरत्सकलौषधीः गावःपंचपवित्राणिवसंतोमधुमाधवे १० अथ
वर्कोल्वादिशेषरंजयंतीःश्रीःसंपात्सात्साक्षाद्भूतिधारणीसतीसेवमगवत्परारमाविरभूदित्यर्थः ७ तस्यारूपा
दिमहिम्नायादिप्तंचेतोयेषांभगवदेहांतरसिस्थितयाश्रियाविलोकितानांदेवानांयस्मात्पूर्वंसर्वसंपत्त्यास्मिं
श्रुसरणावनद्विषर्ययंचक्रेअभिशोषोकादिमहोत्सवइष्ट्वेकेनस्यादिपरिहारेणभगवत्याअभिषेकारमाह
तस्याआसनमित्यादि ८ अष्टासीदारुणीत्वतः आनेनेनयज्ञेनअभिषेचनिकाःअभिषेकोचिताःपंचपवि
त्राणिपंचगव्यानिमधुमाधवौचैत्रवैशाखभवंपललवणादिपाठांतरेपिहंदैवासपवार्थः मधुमासंभवंमधुइति

शंखवेणुवीणास्तु व्यनादयन् तुमुलनिःस्वना येषां तान् मृदंगादीन् १२ पदमाश्रयं ध्रुवं नित्यं अव्यभिचारिणो विद्य-
मानाः संतो गुणा यस्मिन् तन्नान्वविंदत् कुतः कस्यचिद्दोषस्य सद्भावात् तदेवाह नूनमिति त्रिभिः १८ मन्युर्निर्जयो नास्ति
दुर्वासःप्रभृतिषु गुरुशुक्रादिषु संगवर्जितं ज्ञानं नास्ति महत्त्वेपि ब्रह्मसोमादेर्न कामनिर्जयः परतो व्य

मेघा मृदंगपणवमुरुजानकगोमुखान् व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् ११
ततोभिषिषिचुर्देवीं श्रियं पद्मकरां सतीं दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १२ स
मुद्रः पीतकौशेयवाससी समुपाहरत् वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदां १३ भूषणा
नि विचित्राणि विश्वकर्मा प्रजापतिः हारं सरस्वती पद्ममजो नागाश्च कुंडले १४ ततः कृतस्वस्त्य
यनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती
सुशोभनं १५ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ततस्ततो नूपुरवल्गुशिं
जितैर्विसर्पती हेमलतेव सा बभौ १६ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं
गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत १७ नूनं तपो यस्य न मन्युनिर्जयो ज्ञा
नं क्वचित्तच्च न संगवर्जितं कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः १८
धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणं वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न
हि द्वितीयो गुणसंगवर्जितः २० ॥

पाश्रयः परापेक्षत्वं शंकरादिः स किमीश्वरः १९ न भूतसौहृदं परशुरामादिषु न मुक्तिकारणं त्यागः शिविप्रभृ
तिषु पुंसः कार्तवीर्यादेर्वीर्यमस्ति अजवेगनिष्कृतं कालवेगेन परिहृतं तन्न भवति गुणसंगवर्जितः सनकादिर्द्विती

चिरायुष्यपि मार्कंडेयादौ पुर्णीले मंगले नास्ति इंद्रियदमनशीलत्वात् क्वचित्तदप्यस्ति हिरण्यप्रभृतौ आयुषस्तु स्थैर्यं न वेद्यं उ
ज्ञातं श्रीभगवद्वेषेणाकस्मादेव मरणसंभवात् यत्र तूभयं शिवो रुद्रो मार्कंडेयादिवदिंद्रियदमनाद्युभयवान् शीले मंगले वि-
वायुर्निश्चयश्चोभयमस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषः तथापि सोऽप्यमंगलः श्मशानवासाद्यमंगलचेष्टितः श्रीशुका-
देलदीहत्याह कश्चनेति कश्चित्सुमंगलः निरवद्यश्च सन्न मां न कांक्षते आत्मारामत्वात् २१ एवं विमृश्य परमा निरपेक्ष-
मपि मुकुंदमेव वरं वव्रे तत्किमव्यभिचारिभिः सद्भिर्धर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतया चैनं रमापेक्षणवरं सर्वैर्वृतमेतद्देहे

क्वचिच्चिरायुर्न हि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्च न
कांक्षते हि मां २२ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतागुणाश्रयं वव्रे वरं सर्वगुणैरपेक्षितं
रमा मुकुंदं निरपेक्षमीप्सितं तस्यांसदेश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां
तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता २३ ॥

तद्गुणाश्रयं प्रकृतिगुणातीतं पाठांतरे निजैकाश्रयसद्गुणाश्रयमेवार्थः अत एव सर्वैरपेक्षितं किंच सर्वगुणैरणिमा-
दिभिरपेक्षितं तन्मयं भावः यद्यपि स आत्मारामत्वेन प्रत्यपेक्षः तथाप्याश्रितानामणिमादिसिद्धीर्याचतोऽपेक्षितं तेन त-
थामामपि नोपेक्षितं तावतैव च तत्सेवयाहं कृतार्थास्यां किमन्यैः प्राकृतैर्विनितमेव वृतवतीति तदेवाह २२ तस्यांस-
देशे कमनीयां नवकंजमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ कथंभूतां मालां माद्यंतो ये मधु-
व्रताः तेषां वरूथस्य गिरा उपघुष्टां नादितां कथंभूता श्रीः सव्रीडहासेन विकसन्नयनं तेन तस्य उरः स्वधाम यातास्मा-
तीवद्दः प्रतीक्षमाणा तस्थावित्यर्थः २३

भगवानपि त्रैलोक्याभिवृद्धये स्ववक्षस्तलस्याः स्थाने ददाविनाह तस्याः इति श्रियश्रीः सन्ध्योर्विभावाय तस्याः श्रिजगा
तोजननन्याः श्रियः परमस्ताः स्थिरमैथयनावर्धयन् २७ नहिंगैर्विलक्षणनिपाहवै रविनेर्यैर्यथार्थं २८ वाहनीवा
हनाः देवस्यैयद् त्रैमनम्यी स्वरा । २९ दीर्घापीवरौ दोर्दण्डौ यस्य केयुग्रीवः शंखेनाभिरिवत्रिरेखा सहस्रग्रीवायस्यास्ति

तस्याः श्रियस्त्रिजगतो जननी कोजननन्या वक्षो निवासम्भकरोत्सुरश्रेविभूते: प्रीताः प्रजाः सकरुणेन नि
रीक्षणेन यत्रस्थिते थयनसाधिपतीस्त्रिलोकान् २४ शंखचूर्ण शृङ्गानोवादित्रानोपथवल्लनः दे
वाङ्गणानां सखीनां नृत्यगीता गायनामभूत् २५ ब्रह्मरुद्राङ्गिरोमुख्याः सर्वविश्वसृजोविभुं ईडिरे
विनवैर्मैत्रैस्तल्लिङ्गैः पुष्पवर्षिणः श्रियावलोकिता देवाः सप्रजापतयः प्रजाः शीलादिगुणसम्प
न्नालोभिरेनिर्वृतिं परां २६ निस्सत्वालोलुपाराजन्निरुत्साहागतत्रपाः यया चोपेक्षिताः सर्वे दैत्य
दानवाः २७ तथासीदारुणीदेवी कन्याकमललोचना असुराजगृहुस्तां वै हरेरनुमतेन ते २८ अ
थोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः उदतिष्ठन्महाराज पुरुषः परमाद्भुतः दीर्घपीवरदोर्दण्डः
कम्बुग्रीवो रुणेक्षणः श्यामलः तरुणः स्रग्वी सर्वाभरणभूषितः ३१ पीतवासा महोरस्कः सुमृष्टमणि
कुण्डलः नीलकुञ्चितकेशान्तः सुभगः सिंहविक्रमः ३२ अमृतस्य पूर्णकलशं बिभ्रद्वलयभूषितः
स वै भगवतः साक्षाद्विष्णोरंशांशसम्भवः ३३ धन्वन्तरिरिति ख्यातः आयुर्वेददृगिज्यभाक् तमालोक्या
सुराः सर्वे कलशं चामृताभृतम् ३४ लिप्सन्तः सर्ववस्तूनि कलशं तरसाहरन् नीयमानेसुरैस्तस्मिन् क
लशे मृतभाजने ३५ ॥

ग्यः ऊंचितः केशानामेनोपियस्य ३१ पूर्ववीका ३२ इज्याभाक् यज्ञभागभोक्ता अमृतेनामृतं परिपूर्णं ३४
३५ ॥ शुभ ॥

श्री॰
भा॰ स्कं॰
टी॰
११

मिथः दैत्यानां परस्परं कलहो स्यादनेन योगमायया यथार्थं साधयिष्यामि श्रुतो मा खिद्यतेत्याहेति शेषः तदेवाह
मिथ इति तर्षः कामः तद्युक्तानि चेतांसि येषां इत्येवं सम बलानां कलिरभूत् ३७ दुर्बलानां त्वाक्रोशप्रकार
माह देवा इति द्वाभ्यां ये देवास्तुल्यायासेन हेतवः साधकाः तुल्यश्चायासो हेतुश्च प्रवृत्ताविदं येषामिति वा सत्रया
गादौ येषां समं फलं तद्वत् तथा च श्रुतिः सत्रिकाणाः सत्रमासीरन्नितिये यजमानाः ते ऋत्विज इति च तद्रूप
वर्णयति पंचभिः ३९ टीकार्थं ४० प्रेक्षणीयममलश्यामं सर्वेष्ववयवेषु सुंदरं समानयोः कर्णयोराभरणे य

विषण्णमनसो देवा हरिं शरणमाययुः इति तद्दैत्यमालोक्य भगवान्भृत्यकामकृत् ३६ मा खिद्य
त मिथोऽर्थं वः साधयिष्ये स्वमायया मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसां ३७ अहं पूर्वमहं पूर्वं न
त्वं न त्वमिति प्रभो ३८ देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः ३९ सत्रयाग इवैतस्मिन्नेष धर्मः
सनातनः इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ४०
एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ४१ प्रेक्षणीयोत्पला
भासं सर्वावयवसुंदरं समानकर्णाभरणं सुकपोलोन्नसाननं ४२ नवयौवननिर्वृत्तस्तनभारकृ
शोदरं मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ४३ बिभ्रत्सुकेशभारेण मालामुत्फुल्लमल्लि
कां सुग्रीवकंठाभरणं सुभुजांगदभूषितं ४४ विरजांबरसंवीतनितंबद्वीपशोभया कांच्या प्र
विलसद्वल्गुचलच्चरणनूपुरं ४५ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः दैत्ययूथपचेतःसु
काममुद्दीपयन्मुहुः ४६ ॥

सिं उन्नतनासं च ४२ शोभना ग्रीवा येन तत्कंठाभरणं यस्मिन्निति वा सुभुजयोरंगदाभ्यां भूषितं ४४ विरजोनीरे
णसंवीतो नितंब एव द्वीपो विशालत्वात् तत्शोभायस्यास्तस्याः कांच्याश्च कर्षेण विलसद्वल्गु यथा भवत्येवं चल
ती चरणयोर्नूपुरे यस्मिन् ४५ सव्रीडेन स्मितेन सह विक्षिप्ताकंपिता या भ्रूस्तस्या विलासेन सह यान्यवलोकि
तानि तैर्दैत्ययूथपानां चेतस्सु मुहुः कामं उद्दीपयत् ४६

राम

इति श्रीभावार्थदीपिकायामष्टमस्कंधेऽष्टमोऽध्यायः ८ नवमे मोहिनी दैत्यैर्दत्तेर्पितेऽमृतभाजने तद्वंचनेन देवे
भ्योऽमृतं दत्तं तयोर्यते अहो रूपं सौंदर्यं धाम द्युतिः इति वदंतः का त्वमित्यादि पप्रच्छुः २ मथ्नतीव क्षोभयंतीव ३
कस्यासीत्यत्र उक्तम् अस्माभिः यतस्त्वं न कश्चित्कुतः पूर्वे त्वां आहुः नेति त्वां अमरादिभिरस्पृष्टपूर्वां न जानीमः ।

इति श्रीभागवतेऽष्टमस्कंधेऽष्टमोऽध्यायः ८ श्रीशुक उवाच ते ऽन्योन्यतोऽसुराः पात्रं हरंतस्त्यक्तसौ
हृदाः क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियं १ अहो रूपमहो धाम अहो अस्या नवं वयः
इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः २ का त्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि कस्यासि
वद वामोरु मथ्नतीव मनांसि नः ३ न वयं त्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः नास्पृष्टपूर्वां जानीमो
लोकेशैश्च कुतो नृभिः ४ नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणां सर्वेंद्रियमनःप्रीतिं विधातुं
सघृणेन किं । ५ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ज्ञातीनां बद्धवैराणां शं विधत्स्व सु
मध्यमे ६ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः विभजस्व यथान्यायं नैव भेदो यथा भवेत् ७ इत्युप
मंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८ श्रीभगवानुवाच कथं कश्य
पदायादाः पुंश्चल्यां मयि संगताः विश्वासं पंडितो जातु कामिनीषु न याति हि ९ सालावृकाणां स्त्रीणां च
स्वैरिणीनां सुरद्विषः सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां १० श्रीशुक उवाच इति ते क्ष्वेलितैस्तस्या आश्व
स्तमनसोऽसुराः जहसुर्भावगंभीरं ददुश्चामृतभाजनम् ११

तिनः अपि त्वां जानीम एव ४ अस्मामिदं त्वद्दर्शनं त्वीश्वरेण संपादितमित्याहुः नूनमिति सर्वेंद्रियाणां मनसः च प्रीतिं वि
धातुं सघृणेन किं प्रेषितासि किं वा यदृच्छयैवागतासि नैव नूनं प्रेषितासीत्यर्थः ५ भेदो विग्रहो यथा न भवेत्तथा ७
संगताः अनुरक्ताः ९ हे सुरद्विषः १० भावेनाभिप्रायेण गंभीरं यथा भवत्येवं जहसुः ११ ॐ न
मो भगवते वासुदेवाय ॥

श्री॰ ईषद्धास्मितेन शोभा यस्याः तया मया हृतं साधु वा असाधु वा यद्युष्पेन ग्रं गोकुल ननु हिं विभजे १२ ग्रस्तरस्तुंगवाः
भा॰स्कं॰ दैन्यश्रेष्ठाः पुमांसो मिथ्याभिमानान् नः १३ यथोनयो वैरवध्वाप्रीनग्राहहनस्थलदर्णं ग्रहहं नयं चनिर्ग्रन्थस्तन्नं वासः
टी॰ स्वयंभुवा यत्कृतं तन्माधगलि विक्रोशुनाबन्माचसर्वतारागेश्वशुकृशोषुसंविविशुः १४ धूपैरामोदिनायां स्तरभीहृतार
३॰ योगशालायां १६ अथ तस्या शालायां हेन रैवं साकलशपाणिना विवेशाकथं श्रुनामणिबंधादाकनिष्ठकरस्या
करभोबहिः करभसदृशौ सहृहन्नोधिद्रूयस्याः सा उशन्त्कमनीयं दुकूलं यस्मिंस्तेन शोणीनटेन विशालया शो

ततो गृहीत्वा श्रुत्वा मानं नेहृदिर्विभाषईषत्स्मितशोभया गिरा यदुश्रुपेन स्वाचसाधसाधुवाहृतं मया
वो विभजे स्यथामिमां १२ इत्याभिव्याहृतेन तस्या ग्रावर्णा स्तरस्तुंगवाः ग्रप्रमाणविदस्तस्य नद्येत्यन्व
संस्त १३ यथोपनेत्रवंशवासांसि परिधाय हयाहनानि ते कृशोधुशाविश्वान्सर्वेषां ग्रग्रध्रुभिभूषिताः
१४ अथोपोषाहृत नस्त्रानाहृताव हविषानले दत्वागो विश्वभूनेभ्यः हृत नसृस्यपनादिनेः १५ गो
युतिर्भूषविहषुसरेषुदिनिनेषुव धूपामोदितशालायां नहाायांमाल्यदीपकैः १६ तस्यां नरेंद्रक
रभोरु स्त्रदुकूलशोणीतटालसगतिर्मदविह्वलाक्षी साकूजती कनककूपुरशिंजिते न उभसानी
कलशपाणिरथाविवेश १७ तां श्रीसंवीकनककुंडलवारुकर्णाना सा कपोलवदना परदेवनाख्यं
संवीक्ष्य सभमुकुरु तस्मिन्नवीक्षणेन देवासराखिलतनलनपट्टिकाना १८ ॥ ॥

णीतटेन विशालया शोणया अलसा मंदा गतिर्यस्याः सा पार्वतीन रेकरभसदृशायोः ऊर्वोर्लसद्दुकूलं यस्याः सा वा
सौ अत्र शोणीनस्यानस्यानटेना लसगतिस्तु मदेन विह्वलेअक्षिणी यस्याः १७ तां श्रियः संवीक्ष्य वीक्ष्य देवास
राः सभमुकुः कथं श्रुतं कानकमये कुंडले यस्याः सा चासौ चारुवः वा कर्णौ हृयोयस्याः साच
विगलतो विसत्रः स्तनपट्टिकायां यंतो
यस्यांतो १८ ॥

एवं तान्मोहयित्वा यत्नतः तवास्त्रदाहहरिभिः अस्त्राणां स्तंभाद्दानं सर्पाणां क्षीरदानमिव दुर्नयं अन्यायं मत्वा तोय
धानेभ्यो न व्यभजत् अयंभावः दैत्यैर्मदीयं साधु असाधु वा सर्वमन्नमेव अग्रे तो मद्गतं देवानेव पाययिष्यामि किं
दैत्यैर्यथान्यायविभजनस्य तत्तं नवै तेभ्यो नासौ व क्रूरेभ्यो दानेन्यायं अतः तेभ्यः स्तंधानं दास्यामिति १९ पंक्तीः
थयित्वविज्ञाः कल्पयित्वा विधायनासपंक्तिषु तेषु तेषु नलजनीयेषु नास्त्री स्तानं पिशनार्थं प्रवेशयामा
स २० उपसंचरैर्बहुमानप्रियवाक्यादिना नानतिक्रम्यातिक्रम्यगमनैः हरस्यानपिदेवान् २१ नयाह्नतः स्नेहो

अस्त्राणां स्तंभाद्दानं सर्पाणामिव दुर्नयं मत्वा जातिनृशंसानां न तोयमभजत् प्रभुः १९ कल्पयि
त्वा पृथक् पंक्तीः उभयेषां जगत्पतिः तांस्तत्रोपवेशयामास स्वासु स्वासु च पंक्तिषु २० दैत्यान् गृहीत
कलशो वंचयन्नुपसंचरैः हरस्यान्याययामास जरां मृत्युहरां सुधां २१ नेपालयन्तः समयमसुराह्नते
नृप तूष्णीमासन् ह्नतस्नेहाः स्त्रीविवादजुगुप्सया २२ तस्याह्नता नातिप्रणयाः प्राणायापायकातराः
बहुमानेन चाबद्धा नोचुः किंचिन विप्रियं २३ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोमम
पिबच्चंद्रार्काभ्यां च सूचितः २४ चक्रेण क्षुरधारेण जहार पिबतः शिरः हरिः तस्य कबंधस्तु सुध
याप्लावितोऽपतत् २५ शिरस्त्वमरतां नीतं अजो ग्रहमचीक्लृपत् यस्तु पर्वणि चंद्रार्कौ अभिधाव
ति वैरधीः २६

येषु स्त्रिया सह विवादस्य जुगुप्सया २२ ह्नतो नातिप्रणयः स्नेहो यैः प्राणायापायेन कातराभीताः यत्नेनावल्लभ
णाः पूर्वं किंचिद्भवतां तु यूयं तु धीराः द्वतां प्रतीत्य धर्ममित्यादि बहुमानेन च आबद्धा नियंत्रिताः समयपालना
दिभिः यद्वा रेतैः कारणैः अप्रियं किंचिदपि नोचुः किंतु तूष्णीमासन् २३ देवपंक्तौ चंद्रार्कयो
र्मध्ये प्रविष्टः सोमममृतममपिबत् २४ हरिः तस्य शिरो जहार अप्लावितः असंस्पृष्टः
२५ अहं स्पर्धादिवत् ग्रहत्वादिकारणं २६

श्री॰
भा॰ अ॰
टी॰
२१

हरिर्भक्तानामेवायमाः फलंतिनान्येषामित्येवमाख्याननात्तात्पर्यमाह एवमिति समादेशादयोयेषांहेत
र्मंदरादिरर्थः सम्यद्देवतिर्मंथीकरणादिविविधः कल्पः फलेकेषांविज्ञानेकेषांवित्रतिनैवविज्ञायेषांतेफलेवैषम्य
वंतोबभूवुरित्यर्थः तदेवाह तत्रेतियस्यपादपंकजरजःश्रयणाद्देवाअमृतंफलमापुःसएवसेव्यइत्यर्थः
यत्तदोर्नित्यसंबंधात् एतदेवोपपादयति २८ यदिति असुभिः प्राणैः वसुधनैःप्राणादिभिर्देहात्मजादिषुनृभिर्यद्यु
ज्यतेदेहाद्यर्थंयत्क्रियतेइत्यर्थः तदसद्व्यर्थंभवति कुतः पृथक्त्वात्भेदाश्रयत्वात्शाखावानिषेचनवत् तैरेवप्रा

पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः पश्यतामसुरेंद्राणांस्वंरूपंजगृहेहरिः २७ एवंसुरासुरग
णाः समदेशकालहेत्वर्थकर्ममतयोपिफलेविकल्पाः तत्रामृतंसुरगणाःफलमंजसापुर्यत्पादपं
कजरजःश्रयणान्नदैत्याः २८ यद्युज्यतेसुवसुकर्ममनोवचोभिर्देहात्मजादिषुनृभिस्तदसत्पृथक्त्वा
त् तैरेवसद्भवतियत्क्रियतेऽपृथक्त्वात्सर्वस्यतद्भवतिमूलनिषेचनंयत् २९ इतिभागवतेअष्टमस्कं
धेनवमोऽध्यायः ९ श्रीशुकउवाच इतिदानवदैतेयानाविंदन्नमृतंनृप युक्ताःकर्मणियत्ताश्चवासुदेव
पराङ्मुखाः १ साधयित्वामृतंराजन्पाययित्वास्वकान्सुरान् पश्यतांसर्वभूतानांययौगरुडवाहनः
२ सपत्नानांपरामृद्धिंदृष्ट्वातेदितिनंदनाः अमृष्यमाणाउत्पेतुर्देवान्प्रत्युद्यतायुधाः ३ ॥

णादिभिर्भोग्यैर्वादेहेनुयत्क्रियतेइत्यर्थः तत्तुसत्सत्फलंभवति कुतः अपृथक्त्वात्ईश्वरस्यसर्वत्रानुगतत्वात् तत्रदृष्टा
न्तः यत्तरोर्मूलनिषेचनंतद्यथासर्वस्यस्कंधशाखादेरपिभवतीति यद्वाल्पमायेपृथक्त्वापृथक्त्वपर्यालोच्यभेददृष्ट्या
देहाद्युद्देशेनयत्क्रियतेतदसत् अपृथक्त्वपर्यालोच्येश्वरदृष्ट्यातैरेवतैरेवयत्क्रियतेतत्सद्भवतीतिशेषंसमानम्
इतिश्रीभावार्थेअष्टमस्कंधेनवमोऽध्यायः ९ दशमेमत्स्यवाहैतेयैरारब्धेनमृधेसुरैः दैत्यमायाविषण्णेषुदेवेष्वाविर्बभौ
हरिः तदेवममृतावाप्तिर्नाभक्तानामितीरितं भक्तमत्सरतःप्राणहानिःपुनरुदीर्यते १२३ ॐॐॐॐनमोभ
मः ॥

रणः संग्राम उदन्वतः समुद्रस्य तीरे बभूव ५ अन्योन्यं समासाद्य निजघ्नुः ६ चित्रध्वजपटादिभिश्च वीराणां मालाभि
श्च राजितैर्देवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतुरिति चतुर्णामन्वयः यादोभिरिति वा।

ततः सुरगणाः सर्वे सुधया पीतयैधिताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपरायणाः ४ तत्र दैवासु
रो नाम रणः परमदारुणः रोधस्युदन्वतो राजंस्तुमुलो लोमहर्षणः ५ तत्रान्योन्यं सपत्नास्ते संर
ब्धमनसो रणे समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानां भेरीडमरिणां
महान् हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत् ७ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः
हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ८ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः केचिद्गौरमु
खैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः ९ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः शरभैर्महिषैः खड्गै
र्गोवृषैर्गवयारुणैः १० शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः बस्तैरेके कृष्णसारैर्हंसैरन्ये च
सूकरैः ११ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः १२
चित्रध्वजपटै राजन्नातपत्रैः सितामलैः महाधनैर्वज्रदण्डैर्व्यजनैर्बर्हिचामरैः १३ वातोद्धूतोत्तरोष्णी
षैरर्चिभिर्वर्मभूषितैः स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः १४ देवदानववीराणां ध्वजिन्यौ
पाण्डुनन्दन रेजतुर्वीरमालाभिर्यादसामिव सागरौ १५ वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः
यानं वैहायसं नाम कामगं मयनिर्मितं १६ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो अप्रतर्क्यमनिर्दे
श्यं दृश्यमानमदर्शनम् १७

सितैरमलैरातपत्रैश्च बर्हैश्चामरैश्च व्यजनैश्च १३ वातेनोद्धूतैरुत्तरीयैरुष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्
भिः १४ हुर्वटीका १५ असुराणां या चमूः तस्याः पतिः स बलिर्यानमास्थितः १६ ॥

उदयेउदयगिरिशिखरस्थः चंद्रइव विरेजे इति यामन्वयः २८ सर्वतःप्रस्रवणानि यस्मिन्निति सुदयाद्राखहर्पतिः
२५ ननावाहनादीनि येषांते देवा अग्रे सरा स्वमिथो युयुधुः २६ पूर्ववट्टीका २७ द्वंद्वान्येवाह युयोधेति सप्तभिः

आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः वालव्यजनछत्राग्र्यैरेजेचंद्रइवोदये १७ तस्यासन्सर्वतो
यानैर्यूथानांपतयोऽसुराः नमुचिः शंबरोबाणोविप्रचित्तिरयोमुखः १८ द्विमूर्धाकालनाभोथप्र
हेतिर्हेतिरिल्वलः शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरोचनः २० हयग्रीवःशंकुशिराःकपिलोमेघ
दुंदुभिः तारकःचक्रदृक्शुंभोनिशुंभोजंभउत्कलः २१ अरिष्टोरिष्टनेमिश्चमयश्चत्रिपुराधिपः
अन्येपौलोमकालेयानिवातकवचादयः २२ अलब्धभागाःसोमस्यकेवलंक्लेशभागिनः सर्वए
तेरणमुखेबहुशोनिर्जितामराः २३ सिंहनादान्विमुंचंतःशंखान्दध्मुर्महारवान् दृष्ट्वासपत्नानु
त्सिक्तान्बलभित्कुपितोभृशं २४ ऐरावतंदिक्करिणमारूढोशुशुभेस्वराट् यथास्रवत्प्रस्रवण
मुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतोदेवानानावाहध्वजायुधाः लोकपालाःसहगणैर्वाय्वग्नि
वरुणादयः २६ तेन्योन्यमभिसंसृत्यक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधि
नः २७ युयोधबलिरिंद्रेणतारकेणगुहोस्यत वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेतिना २८ यम
स्तुकालनाभेनविश्वकर्मामयेनच शंबरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजितेननमुचि
रश्विनौवृषपर्वणा सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच ३० राहुणाचतथासोमःपुलोमायुयु
धेनिलः निशुंभशुंभयोर्देवीभद्रकालीतरस्विनी ३१

अस्यतप्रास्यात् युयुध्यतेत्यर्थः २८ सूर्योदेवएकएवशतेनबलिसुतैः बाणोज्येष्ठोयेषांतैः ३० निशुंभशुंभाभ्यांदे

ग्रायरोहंतीत्यारोहाः तैः सहिता ग्रन्ये च वाहाः पूर्वं तु केवलं च नाद्रयउक्ताः कथंभूताः निहतानां बाहूनां द्वयोर्येषां
छिन्नानि ध्वजादीनि येषां तेषां देवादीनां यदाघातैरथ्यो गैश्च चूर्णिताद्रायोधनादुल्वणभूमैरुत्थितो रेणुर्दिशः खं
द्युमणिं च स्तूर्यं छादयन्स्रवैवावादेन्यवर्नत कथंभूताद्दसृक्स्रुतिभिः रक्तसरणैः परिस्नुतात्सिक्तात् यद्वापरि
स्नुतात्सिक्तात् यद्वापरिस्रवनाड्डितोत्यवर्नत भावेक्तः रक्तपाराणेन तर्यनशुक्लेलनादित्यर्थः प्रथमांतपाठे रे

दृष्ट्वा कपिलजंबेन महिषेणाविभावसुः इल्वलः सह वातापिं ब्रह्मपुत्रैररिंदम २२ कामदेवेन ब्र
मंथउत्व लोमात्नभिः सह बृहस्पतिस्तु शानस्सा नरकेन शनैश्चरैः २३ मरुतो निवातकवचैः का
लेयैर्वसवोऽमराः विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह २४ तएवमाजावसुराः सुरेन्द्रा द्वंद्वे
न संहत्य च युध्यमानाः अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः २५ भुशुंडि
भिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंडिपा
लैश्च शिरांसि चिच्छिदुः २६ गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः नि
कृत्तबाहूरुशिरोधरांघ्रयः छिन्नध्वजेष्वासतनुत्रभूषणाः २७ तेषां पदाघातरथांगचूर्णितादायो
धनादुल्वण उत्थितस्तदा रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्तताऽसृक्स्रुतिभिः परिस्नुताः २८
शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः महाभुजैः साभरणैः सहायुधैः सा प्रा
स्तृता भूः करभोरुभिर्बभौ २९ ॥

णोर्विशेषणं २७ टीकापूर्वं २८ शिरोभिर्महाभुजैस्सकरसदृशैरूरुभिश्च साभरणाभूः प्रवर्षेण आस्तृता
तासती बभौ कथंभूतैः शिरोभिः उद्धूतानि उत्पतितानि किरीटानि कुंडलानि च येभ्यः संरंभयुक्ताः दृशो येषां
भुजैः परिदष्टाः दच्छदाः अधरा येषां तैः २९ ॥ राम ॥

श्रीः
भा॰ अ
टी॰
२२

पतितानियानिस्वशिरांसितत्रस्थैरक्षिभिः तैः पश्यंतइत्यर्थः उद्यतानिआयुधानियेषुतैर्दोर्दंडैर्युक्ताः ४० वाहा
नैरावतपादरक्षकान् आरोहं गजायंतारं आर्च्छयत् विव्याध ४१ दुर्मर्षः असहनोबलिः ४३ टंकवन्तीशृंगाणिशि

कबन्धास्तत्रचोत्पेतुः पतितस्वशिरोऽक्षिभिः उद्यतायुधदोर्दंडैः राधावंतोभटान्मृधे ४० बलिंमहेंद्रो
दशभिस्त्रिभिरैरावतंशरैः चतुर्भिश्चतुरोवाहानेकेनारोहमार्च्छयत् ४१ सतानापततःशक्रस्ता
वद्भिःशीघ्रविक्रमः चिच्छेदनिशितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्यकर्मोत्तमंवीक्ष्यदुर्मर्षःश
क्तिमाददे तांज्वलंतीमहोल्काभांहस्तस्थामच्छिनद्धरिः ४३ ततःशूलंततःप्रासंततस्तोमरमृ
ष्टयः यद्यच्छस्त्रंसमादद्यात्सर्वंतदच्छिनद्विभुः ४४ ससर्जाथासुरींमायामंतर्धानगतोऽसुरः त
तःप्रादुरभूच्छैलःसुरानीकोपरिप्रभो ४५ ततोनिपेतुस्तरवोदह्यमानादवाग्निना शिलाः
सटंकशिखराःचूर्णयंत्योद्विषद्बलं ४६ महोरगाःसमुत्पेतुःदंदशूकाःसवृश्चिकाः सिंहव्या
घ्रवराहाश्चमर्दयंतोमहागजान् ४७ यातुधान्यश्चशतशःशूलहस्ताविवाससः छिंधिभिंधीति
वादिन्यस्तथारक्षोगणाःप्रभो ४८ ततोमहाघनाव्योम्निगंभीरपरुषस्वनाः अंगारान्मुमुचुर्वा
तैराहतास्तनयित्नवः ४९ सृष्टोदैत्येनसुमहान्वह्निःश्वसनसारथिः सांवर्तकइवात्युग्रोविबुध
ध्वजिनीमधाक् ५० ततःसमुद्रउद्वेलःसर्वतःप्रत्यदृश्यत प्रचंडवातोद्धूततरंगावर्तभीषणः
५१ एवंदैत्यैर्महामायैरलक्ष्यगतिभीरणे सृज्यमानासुमायासुविषेदुःसुरसैनिकाः ५२ नतत्प्र
तिविधिंयत्रविदुरिंद्रादयोनृप ध्यातःप्रादुरभूत्तत्रभगवान्विश्वभावनः ५३

खरैः सहिताः ४६ स्तनयित्नवश्चअंगारान्मुमुचुरित्यन्वयः ४९ अधाक् अधाक्षीत् दग्धवानित्यर्थः ५० उ
द्धूतैःतरंगैरावर्तैश्चभीषणः ५१ एवमन्यैश्चदैत्यैःसृज्यमानासु ५२ यत्रयदातदातैःध्यातःसन् ५३ ॥
ॐॐॐनमोनमः

ष्टौ आयुधयुक्ता बाहवो यस्य श्रीकौस्तुभमनर्घ्यं किरीटं च कुंडले च उल्लसंति श्रीकौस्तुभादीनि यस्मिन् ५४ असुराणां
कूटकर्ममंत्रादिप्रयोगाः तस्माज्जाता ता महिना महिम्ना हरेः स्मृतिरेव सर्वासां विपदां विमोक्षणा किमुत हरेः प्रवेश इ-
त्यर्थः ५५ इभारिवाहः सिंहवाहः अहिनोत् क्षिप्तवान् लीलयैव तत् गृहीत्वा अहनत् दहन् ५६ हे नृप यस्य चक्रेण कृत्तशिरसौ

ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभान-
र्घ्यकिरीटकुंडलः ५४ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः स्वप्नो यथा हि प्रति-
बोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं ५५ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोद-
थ कालनेमिः तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ५६ माली सुमाल्य-
तिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तं आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोऽच्छिन-
दरेर्नदतोऽरिणाद्यः ५७ इति श्रीभागवते अष्टमस्कंधे दशमोऽध्यायः १० श्रीशुक उवाच अथो सुराः प्रत्युप-
लब्धचेतसः परस्य पुंसः परयानुकंपया जघ्नुर्भृशं शक्रसमीरणादयः तांस्तान्रणे यैरभिसंहताः पुरा
१ वैरोचनाय संरब्धो भगवान्पाकशासनः उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः २ वज्रपाणिस्तमाहे-
दं तिरस्कृत्य पुरःस्थितं मनस्विनं सुसंपन्नं विचरंतं महामृधे ३ नटवन्मूढ मायाभिर्मायेशान्नो जिगी-
षसि जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं ४

यत्ततः तेन तथाभूतमपि आहत्य संयुगे अंडजेंद्रं गरुडमहनत् तं हत्वा गदामुत्क्षिपतस्त्वर्थः आद्यः हरिः ५७ इति श्रीभा-
वार्थदीपिकायामष्टमस्कंधे दशमोऽध्यायः १० एकादशे तु देवेषु दैत्यघातिषु नारदः देवान्निवारयच्छुक्रो मृतान्दै-
त्यानजीवयत् उदयच्छत् उद्गृहीतवान् २ निबद्धानि अक्षाणि येषां तान् बालान् जित्वा नटः कपटदृष्टिर्यथा तेषां धनं हरति
तिरस्कारे हेतुः मायेशान् अस्मान् नेतुमिच्छसि मत्स्यभावे दृष्टत्वपाद ४ ॥

श्री॰
भा॰स्कं॰
टी॰
४४

आरुरुक्षंतिआरोढुमिच्छंतियेउत्सिसृप्संतिउत्सर्पनमिच्छंतिमोदमिच्छंतीत्यर्थः अथोविधुनोमिपातया
मि ५ कालरशनंकालवशवर्तिअनेनहृष्यंति नचपर्वंविविक्तेयूयमपंडिताअनिपुणाः ८ तत्रकीर्तिजयादा

आरुरुक्षंतिमायाभिरुत्सिसृप्संतियेदिवं तान्दस्यून्विधुनोम्यज्ञान्पूर्वंस्वात्मपदाश्रयः ५ सोहंदुर्मा
यिनस्तेद्यवज्रेणशतपर्वणा शिरोहरिष्येमंदात्मन्घटस्वज्ञातिभिःसह ६ बलिरुवाच संग्रामेवर्त
मानानांकालचोदितकर्मणां कीर्तिर्जयोजयोमृत्युः सर्वेषांस्युरनुक्रमात् ७ तदिमंकालरशनंज
गत्पश्यंतिसूरयः नहृष्यंतिनशोचंतितत्रयूयमपंडिताः ८ नवयंमन्यमानानामात्मानंतत्रसाध
नं गिरोवःसाधुशोच्यानांगृह्णीमोमर्मताडनाः ९ शुकउवाच इत्याक्षिप्यविभुंवीरोनाराचैर्वी
रमर्दनः आकर्णपूर्णैरहनदाक्षेपैराहतंपुनः १० एवंनिराकृतोदेवोवैरिणातथ्यवादिना नामृ
ष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११ प्राहरत्कुलिशंतस्माअमोघंपरमर्दनं सयानोन्यपतद्भूमौछि
न्नपक्षइवाचलः १२ सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत् अभ्ययात्सौहृदंसख्युर्हतस्यापि
समाचरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा जत्रावताडयच्छक्रंगजंचसुमहाबलः
१४ गदाप्रहारव्यथितोभृशंविह्वलितोगजः जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथो
मातलिनाहरिभिर्दशशतैर्वृतः आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६ तस्यतत्पूजयन्क
र्मयंतुर्दानवसत्तमः शूलेनज्वलतातंतुस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षांसत्वमालंब्यमा
तलिः इंद्रोजंभस्यसंक्रुद्धोवज्रेणापाहरच्छिरः १८ जंभंश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः नमु

[illegible]

वात्मानंसाधनंमन्यमानानांवोगिरोनगृह्णीमः मर्मस्पृशाताडनंयाभिस्ताः ८ ९ विभुमिंद्रं १० तोत्रमंकुशः ११
सयानः विमानसहितः १२ नमुचिर्बलःपाकाश्चेतत्रयआगमन् त्वरयान्वि
ताविक्रमानाम् १९ ॥

राम॰
४४

हरीन्निनिचिभिः हर्यश्वस्येंद्रस्यतानाबद्धिःदशभिः शातैः २० अहमरैरेविद्धा २३ शाहेकालीनमूर्च्छे २४
वणिक्काया वणिजाः भिन्नानौर्येषां तेभिन्ननावइत्यर्थः २५ नराषाडिंद्रः सखादिसहितो विनिर्गतः अग्रणी

वचोभिः पुरुषैरिंद्रमर्दयंतोऽस्यमन्मस्त शरैरेवाकिरन्मेघा धाराभिरिव पर्वतं २० हरीन्दशशताना
न्याजो हर्यश्वस्य बलःशरैः नाबद्धिर्दयामास पुरुगणपसज्जुहुतवान् २१ शतानाभ्योमानलिं पाको रथा
वावयशः पृथक् सहस्रसंधानमोदेनाग्नस्कंधेनमथ शरणे २२ नमुचिः पंचदशभिः स्वर्णपुंखैर्म
हेषुभिः शाहमध्वानदंतसंख्येसनोयइवनोऽस्यः २३ सर्वतः शरवृष्टेन शक्रेसरथसारथिं छाद
यामास रघुराः शाहसूर्यइवांबुदः २४ शूलत्रयेन नलमसीव विह्वला विभक्ताः सुरैर्वगणाः सहाशु
याः अनायकाः शत्रुबलेन निर्जिताः वणिक्काया भिन्ननवो यथार्णवे २५ ततः नराषाडिषुवद्रूपेण
राहिनिर्गतः साश्वरथध्वजोग्रणीः बभौ दिशः स्वे पृथिवीचरो वयन्स्वतेजसा सूर्य इवस्वरूपात्मये २६
निरीदय हतनोदेवः पौरेभ्यार्दितो रणे उदयकुंडिपुहेतेनवत्त्वेवज्ज्वयशेहया २७ सतेन्नवाहथारे
णाशिरसीबलपाकयोः ज्ञातीनो पश्यतो राजन्नजहार जनयेभयं २८ नमुचिस्तद्वधं दृष्ट्वा शावा
मर्षरुषान्वितः जिघांसुरिंद्रं नृपते चकार परमोद्यमं २९ अश्मसारमयं शूलं घंटावद्धेमभूषणं
प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति विनर्जयन् ३० प्राहिणोद्देवराजाय तं निरंशुपराडिव ३१ तदाप
तद्गगनतले महाजवं विचिछेद हरिरिषुभिः सहस्रधा। तमाहनं दपकुलिशेनकंधरे रुषान्वितः
त्रिदशपतिः शिरोहरन् ३१ ततस्याहितत्वचमपिवज्रऊर्जितो विभेदयः सुरपतितोजसे रिनः तद
द्भुतं परमतिवीर्यवृत्रभिन्निरस्कृतेन नमुचिशिरोधरत्वचा ३२॥

णीसारथिः २८ शोकामर्षाभ्यांपुत्रकृया रुषाक्रोधेनान्वितः २९ घंटावद्घंटाभिर्युक्तं ३० अतिवीर्यवृत्रभे
तस्मीतितथा ३२ ॥ राम ॥ राम ॥

पतत्रैःपक्षैः ३४ सारमयंवीर्याधिकंत्वाष्ट्रंतपः एवंवृत्रःसयेनवज्रेणमयाविपाटितः ३५ ब्रह्मतेजःदधीचेः
सामर्थ्यं ३६ शुष्कार्द्राभ्यां ३७ मृत्युर्नैवेति ३८ उभयात्मकमेवाह नशुष्केणनचार्द्रेणफेनेनेतियावत्

तस्मादिन्द्रोबिभेच्छत्रोर्वज्रःप्रतिहतोयतः किमिदंदैवयोगेनभूतंलोकविमोहनं ३३ येनमेपूर्व
मद्रीणांपक्षच्छेदःप्रजात्यये कृतोनिविशतांभारैःपतत्रैःपततांभुवि ३४ तपःसारमयंत्वाष्ट्रंवृत्रो
येनविपाटितः अन्येचापिबलोपेताःसर्वास्त्रैरक्षतत्वचः ३५ सोयंप्रतिहतोवज्रोमयामुक्तोसुरे
ल्पके नाहंतदाददेदण्डंब्रह्मतेजोप्यकारणं ३६ इतिशक्रंविषीदंतमाहवागशरीरिणी नायं
शुष्कैरथोनार्द्रैर्वधमर्हतिदानवः ३७ मयास्मैयद्वरोदत्तोमृत्युर्नैवार्द्रशुष्कयोः अतोन्यश्चिंतनी
यस्तेउपायोमघवन्रिपोः ३८ तांदैवींगिरमाकर्ण्यमघवान्सुसमाहितः ध्यायन्फेनमथापश्य
दुपायमुभयात्मकं ३९ नशुष्केणनचार्द्रेणजहारनमुचेःशिरः तंतुष्टुवुर्मुनिगणामाल्यै
श्चावाकिरन्विभुं ४० गन्धर्वमुख्यौजगतुर्विश्वावसुपरावसू देवदुंदुभयोनेदुर्नर्तक्योननृतुर्मुदा
४१ अन्येप्येवंप्रतिद्वंद्वान्वाय्वग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृगान्केसरिणोयथा ४२
ब्रह्मणाप्रेषितोदेवान्देवर्षिर्नारदोनृप वारयामासविबुधान्दृष्ट्वादानवसंक्षयं ४३ नारदउवा
च भवद्भिरमृतंप्राप्तंनारायणभुजाश्रयैः श्रियाःसमेधिताःसर्वउपारमतविग्रहात् ४४ शुक
उवाच संयम्यमन्युसंरंभंमानयंतोमुनेर्वचः गीयमानानुचरैर्ययुःसर्वेत्रिविष्टपं ४५ येवशि
ष्टारणेतस्मिन्नारदानुमतेनते बलिंविपन्नमादायअस्तंगिरिमुपागमन् ४६ तत्राविनष्टावयवा
न्विद्यमानशिरोधरान् उशनाजीवयामाससंजीविन्यास्वविद्यया ४७ बलिश्चोशनसास्पृष्टःप्रत्यापन्नेंद्रि

तिः अपांफेनेननमुचेःशिरश्छेदोवर्तयतइति ४० अनुचरैरुपगीयमानाःसंतः उपगीयमानैरनुचरैःस
हेतिवा ४५ अविनष्टाअवयवायेषांविद्यमानाशिरोधरायेषांतान् ४७ प्रत्यापन्नानिपुनःप्राप्तानिइंद्रियाणिस्मृ

इति श्रीभावार्थदीपिकायामष्टमस्कंधे एकादशोऽध्यायः ११ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकं भवं संमोह
यामास हरिः पुनरमोचयत् अमृतान्नदावाविलोमामीयथानतदमृतं इति वक्ष्ये महादेवमोहाय मुपवर्ण्यते हरिः सोम
मपाययदितीदं निशाम्य मायया स्त्रीतनजनरूपं दृष्ट्वा यया विमुग्धेरणान्वयः २ सोमयाद्यमयामस ३ तथापि महामाया
विनियवमेश्वरेन हि किल किंचिदद्भुतमिव दर्शयेत् मम कौतूहलेन द्रष्टुमागता इति वक्ष्यथा संबोधयन् स्तौति ४

इति श्रीभागवतेऽष्टमस्कंधे एकादशोऽध्यायः ११ बादरायणिरुवाच वृषध्वजो निशम्येदं योषिद्रूपे
ण दानवान् मोहयित्वा सुरगणान्हरिः सोमममपाययत् १ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः
सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः २ स भाजितो भगवता सादरं सोमया भवः सोपविष्ट उवाचेदं
प्रतिपूज्य स्मयन्हरिं ३ महादेव उवाच देवदेव जगद्व्यापिन् जगदीश जगन्मय सर्वेषामपि भावानां
त्वमात्मा हेतुरीश्वरः ४ आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चि
द्भवान् ५ ॐ नमो भगव
ते वासुदेवाय

देवदेव इति हे देवानां देव इत्यतस्त्वामाह हे जगद्व्यापिन् कुतः हे जगन्मय तर्हि किं प्रधानेन न हे जगदीश न स्वतः न त्वाह
सर्वेषामपि हेतुः अत ईश्वर आत्मत्वाच्च न जडं प्रधानं त्वमित्यर्थः ५ ननु जगन्मयत्वोक्त्या जगत उत्पत्त्यादिनाम
त्वमेव न च जाड्यं न च ममापि किं तथात्वं स्यादित्येतन्निन्हीत्याह आद्यंतौ मध्यं च अस्य जगतो ब्रह्मणो भवति अस्य च अव्ययस्य
एतानि आद्यंतमध्यानि न संति यच्च ब्रह्म इदं कार्यमस्य दृग्रूपमहंकारस्य दृष्ट्वा बहिर्भोग्यं अन्तरे भोक्ता च तत्सत्यं च चिद्रूपं भ
वान् अतो न तव विकारादिदोषा इत्यर्थः ६ टीकाकृतः श्लोकोऽयं तथापि किंचिन्न चाश्चर्यं वचनाश्चर्यमानसाः इति वा
सना हा देवस्य द्रष्टा वह्निरिमद्भिः ॥

श्रीः
भा०ष०
टी०
२६

तदेवंभूतं तं मुमुक्षूणामाचारः प्रमाणमित्याह तमेवेति उभयतः इहामुत्र च संगं त्यक्त्वा ६ ननु ब्रह्मैव चेदं हंत तर्हि संगोदा
सीनस्य मम चरणांभोजोपासनया किं तेषां तत्राह त्वमिति ब्रह्मत्वेपि त्वमात्मनमुदासीनः किंतु विश्वप्रपंचस्योदयादी
नां हेतुः तदुपाधीनामात्मनां जीवानामीश्वरश्च ततस्तत्फलदातासि हि किं राजादिवत्कयाप्यपेक्षया सेवकेभ्यः फलं ददा
सि न हि न हि त्वमनपेक्ष एव एवं तर्हि किमीश्वरत्वेन तत्राह तेषामिति तत्फलदानार्थमपेक्षेति इति तदपेक्षः तस्य भावः तद
पेक्षता तया त्वमनपेक्ष एव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि पूर्णममृतं च सत्त्वरूपं विषयसुखवैलक्षण्यार्थमाह स्व
विकारं निरामानंदमात्रं च यतः विशोकं तत्कुतः विगुणं किं च त्वमनन्यत् न विद्यते अन्यद्यस्मात् ब्रह्मव्यतिरिक्ताभावादपि
निरपेक्षत्वमित्यर्थः तर्हि सर्वात्मकत्वेन तत्तत्कार्यसंयोगस्तवास्त्वित्याह अन्यत् सर्वतो व्यतिरिक्तं च कारणत्वान्नैव

तस्यैव चरणांभोजं श्रेयःकामा निराशिषः विसृज्योभयतः संगं मुनयः समुपासते ६ त्वं ब्रह्म पूर्णममृतं
विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तद
पेक्षतयानपेक्षः ७ एकः त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि
जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८ त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं
सदसतोः पुरुषं परेशं अन्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ९

भूतस्य सर्वात्मकब्रह्मस्वरूपस्य तवात्मापेक्षास्ति अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः ७ अतत्त्व
तमस्य त्वदेकस्य कृतस्त्या शंक्याह दृष्टांतेनोपपादयति सदसत् कार्यकारणरूपं द्वयमद्वयं च परमकारणं त्वमेवैकः
कृतं कुंडलादिरूपं द्वयमकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेव इह त्वयि तिवस्तुतो भेदो नास्ति कथं तर्हि भेदप्रती
तिस्तत्राह अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तवायं गुणव्यतिकरो भेदो न स्वतः ८ अतएव त्वां बहुधा वर्णयं
तीत्याह तत्त्वमस्य केपि न जानंतीत्याह त्वामिति त्वां ब्रह्म वेदांतिनोऽवयंति मन्यंते त्वामेव धर्मं मीमांसकाः अन्ये प्रकृतिपुरुष
योः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञानक्रिया योगा सह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुक्तं परं पांचरा
त्राः महापुरुषं पातंजलाः ९

परायुत्त्रयामसर्गाः सत्वगुणेनसृष्टा अपि येन त्वया विरचितं विश्वमायावेल्लनं तन्न जानेति किं पुनरत्र हेई
पूगानुभ्रमहराजसंतामसं वहहं नेडत्विन्निश्चयेषांनेन जानेनीति किंशवक्तव्यं १० किं न त्वं सर्वं जानासीत्याह सर्वेस
वैश्रवरस्त्वया श्रेपि जानासि विं तन्सर्वं समीहितं स्वकृतं स्वादः स्थितिजन्मनाशं अस्य जगतो जन्मादि भूता
नामीहितो जगतो भवबंधमोक्षव्यामोहस्थानः चराचरात्वदेहजानेविवयथावायुरनिश्चलितयाकथंमो
नाहं परायुर्ऋषयो नमरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः यन्माययामुषितचेतस ईश दै
दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः १० स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो
भवबंधमोक्षा वायुर्यथाविशति खं च चराचराख्यं सर्वं तदात्मकतयावगमोवरुन्से ११ अवतारा म
यात्तगुरसमात्मस्य नेगुणाः सोहं तदुत्तममिच्छामियत्तेयोषिद्वपुस्तवमते १२ येन संमोहिता दैत्याः पा
यिता अमृतं सुराः तद्दिदृक्षव आयाताः परं कौतूहलं हि नः १३ शुक उवाच एवमभ्यर्थितो विष्णु
भगवान् शूलपाणिना प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत १४ कौतूहलाय दैत्यानां योषिद्वेषो
मया कृतः पश्यता सुरकार्याणि गते पीयूषभाजने १५ तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम
कामिनां बहुमन्तव्यं संकल्पप्रभवोदयं १६ शुक उवाच इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत स
र्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया १७ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे
विक्रीडितीं कन्दुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलाम् १८
चराचरात्मस्तेन तदात्मकतया तस्य सर्वस्यात्मत्वे ऐतत्पर्थः आत्मत्वेहेतुरवगमः ज्ञानरूप इति एवं स्तुत्वा प्रार्थयति नवतारा यद
नित्रवतारा इति द्वाभ्यां १२ सुरकार्याणि योषिद्वेषेण भविष्यन्तीति पश्यता अयं भावः अवश्यं तावद्दैत्यान्
दैत्यान् वंचयित्वा देवेभ्योऽमृतं देयं तत्र चैवं वेषमनुरूपं न रोचते नैव वक्तव्यं मोहनादि सारे कामिनी रूपम
यायुक्तमिति १५ तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयो यस्मात् १६ विचित्राणि पुष्पाणि अरु
णाः पल्लवाश्च येषां ते द्रुमा यस्मिन् लसद्दुकूलेन पर्यस्ते परिहिते नितम्बे मेखला यस्यास्ताम् १७ १८ ॥ ॥

श्री॰ भा॰ सु॰ टी॰ २०

एवंभूतां कंदुकलीलावशेन या आवर्तनोद्वर्तने नमनोन्नमने ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहाराणां
च ऊरूणां च भारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलं तेन ततस्ततो नयंती १९ दिक्षु भ्रमतः
कंदुकस्य चापलैः चांचल्यैः भृशं प्रोद्विग्नतारे आयते च लोले लोचने यस्याः स्वकर्णाभ्यां विभ्राजिते कुंडले ताभ्यां च
नीलालकैश्च मंडितमाननं यस्याः २० सन्नह्यतीं बध्नतीं जगद्विमोहयंती २१ तां वीक्ष्य देवः श्रीरुद्रः आत्मानमं

आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालेन
नयंतीं ततस्ततः १९ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्रा
जितकुंडलोल्लसत्कपोलनीलालकमंडिताननां २० श्लथद्दुकूलं कबरीं च विच्युतां संनह्यतीं वाम
करेण वल्गुना विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया २१ तां वीक्ष्य देव इ
ति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा
नात्मानमंतिक उमां स्वगणांश्च वेद २२ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्
स्त्रियाः वासः ससूत्रं लघु मारुतो हरद्भवस्य देवस्य किलानुपश्यतः २३ एवं तां रुचिरापांगीं द
र्शनीयां मनोरमां दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल २४ तयापहृतविज्ञानस्तत्कृतस्म
रविह्वलः भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ २५ सा तमायांतमालोक्य विवस्त्रा व्रीडिता
भृशं निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत २६ ॥

॥

तिकेऽपि उमां स्वगणांश्च न वेद कथंभूतः इति एवंभूतया कंदुकलीलया ईषद्व्रीडानया अस्फुटं स्मितं तेन स
ह विसृष्टाः कटाक्षाः तेन मुष्टो वंचितः अत एव स्वयमपि स्त्रियाः प्रेक्षणानि यावत प्रतिसमीक्षणानि ताभ्यां विह्वलः आ
त्मा मनो यस्य २२ तं कंदुकमनुव्रजंत्याः स्त्रियाः लघु सूक्ष्मं वासः ससूत्रं कांचीसहितं २३ विषज्जंत्यामाकुंचित
कटाक्षैरात्मानं निरीक्षमाणायां तत्पदं तस्याः समीपं ययौ २५ २६ ॥

॥ राम॰ २०

प्रंगहेराजन् २२ एतांतामनुधावन्नहरः सरित्सरःसशैलादिषुचसंनिहितोबभूव २६ तद्दुत्तमायुयाजडीकर

तामन्वगच्छद्भगवान्भवःप्रमुषितेंद्रियः कामस्यचवशंनीतः करेणुमिवयूथपः २६ सोनुव्रज्याति
वेगेनगृहीत्वानिच्छतींस्त्रियम् केशबन्धउपानीयबाहुभ्यांपरिषस्वजे २७ सोपगूढाभगवताकरि
णाकरिणीयथा इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा २८ आत्मानंमोचयित्वांगसुरर्षभभुजांत
रात् प्राद्रवत्सापृथुश्रोणीमायादेवविनिर्मिता २९ तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः प्रत्यप
द्यतकामेनवैरिणेवविनिर्जितः ३० तस्यानुधावतोरेतश्चस्कंदामोघरेतसः शुष्मिणोयूथपस्येववा
सितामनुधावतः ३१ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः तानिरूप्यस्यहेम्नश्चक्षेत्राण्यासन्महीप
ते ३२ सरित्सरस्सुशैलेषुवनेषूपवनेषुच यत्रक्वचासन्नृषयःतत्रसन्निहितोहरः ३३ स्कन्नेरेता
सिसोपश्यदात्मानंदेवमायया जडीभूतंनृपश्रेष्ठसन्यवर्ततकश्मलात् ३४ अथावगतमाहात्म्य
आत्मनोजगदात्मनः अपरिज्ञेयवीर्यस्यनमेनेतदुहाद्भुतं ३५ तमविक्लवमव्रीडमालक्ष्यमधुसू
दनः उवाचपरमप्रीतोबिभ्रत्स्वांपौरुषीतनुं ३६ श्रीभगवानुवाच दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठा
मात्मनास्थितः यन्मेस्त्रीरूपयास्वैरंमोहितोप्यंगमायया ३७ कोनुमेतितरेन्मायांविषक्तःस्त्वदृ
तेपुमान् तांस्तान्विसृजतींभावान्दुस्तरामकृतात्मभिः ३८ सेयंगुणमयीमायानत्वामभिभविष्य
ति मयासमेताकालेनकालरूपेणभागशः ३९ शुकउवाच एवंभगवताराजन्श्रीवत्सांकेनस
त्कृतः आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ४० आत्मांशभूतांतांमायांभवानींभगवान्भवः
संमतामृषिमुख्यानांप्रीत्याचष्टाथभारत ४१

णा २५ स्वांनिष्ठांप्रकृतिं २७ कालेनसृष्ट्यादिनिमित्तेनमयाकालरूपेणभागशोरजआद्यंशेनसमेतामदधीनास ती ३९

श्री॰ भा॰ अ॰ टी॰ ५८

अध्यायार्थनिगमने इति ४२ एतत्कीर्तनादेः फलमाह एतदिति ४६ भगवताहृते भक्तपतापानेस
दत्रमस्तु रीतिप्रसत्तामविषये भावे भजनेनेनगम्यं प्रपन्नान् सिंधुमथ्यं सिंधोर्मथने जातममृतमयः प्राश
यत् अमी नयत ४७ इति श्रीभावार्थदीपिकायामष्टमे द्वादशोऽध्यायः १२ त्रयोदशे तु वर्ण्यन्ते सप्त सावर्णिकादयः क्रमात्
मन्वन्तराणि सर्वाणि षड्विधानि पृथक् पृथक् सप्त सावर्णिमन्वन्तराण्याह मनुरित्यादिना यावदध्यायसमा

अपि व्यपत्रपस्त्वमजस्य मायया परस्य पुंसः परदेवताया अहं कलानामृषभोपि मुह्ये ययावशो
न्ये किमुतास्वतंत्राः ४२ यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्त उपारतं वै स एष साक्षात्पुरु
षः पुराणो न यत्र कालो विशते न वेदः ४३ श्रीशुक उवाच इति तेभिहितस्तात विक्रमः शार्ङ्ग
धन्वनः सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ४४ एतन्मुहुः कीर्तयतोऽनुशृण्वतो न रि
ष्यते जातु समुद्यमः क्वचित् यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ४५
असदविषयमंघ्रिं भावगम्यं प्रपन्नान् अमृतममरवर्यानाशयत्सिंधुमथ्यं कपटयुवतिवेषो
मोहयन्यः सुरारीं स्तमहमुपसृतानां कामपूरं नतोस्मि ४६ इति श्रीभागवते अष्टमस्कंधे द्वा
दशः १२ श्रीशुक उवाच मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्तमो वर्तमानो यस्तदपत्या
नि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्य
ते २ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ३ आदित्या
वसवो रुद्रा विश्वेदेवा मरुद्गणाः अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठ
श्च विश्वामित्रोथ गौतमः जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ५ अत्रापि भगवज्जन्म क
श्यपाददितेरभूत् आदित्यानामवरजो विष्णुर्वामनरूपधृक् ६ संक्षेपतो मयोक्तानि सप्तमन्वं

ति १ आदित्यादयो देवा इति वंशान्वयः भगवतो जन्मावतारः तमेवाह आदित्यानामिति विवस्वान् अर्यमा
पूषेत्यादयः नामधेयाः वर्जन्त्ययाः ६ एवं तावदवतारेणान्वितानि ७ अष्टमं मन्वन्तरमाह विवस्व

पत्र॰ ५८

एके वडवां तृतीयामाहुः मम तु संज्ञैव वडवेति तदुक्तं षष्ठे सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि इति
यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः सुताः ९ सावर्णिः पुत्रः १० पदत्रयं याचमानाय इमां सर्वां महीं स

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ९ सा
वर्णिस्तपती कन्या भार्या संवरणस्य च शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ १० अष्टमेन्तर आ
याते सावर्णिर्भविता मनुः निर्मोकविरजस्काद्याः सावर्णितनया नृप ११ तत्र देवाः सुतपसो विर
जा अमृतप्रभाः तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति १२ दत्त्वेमां याचमानाय विष्णवे यः पदत्रयं
राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति १३ योसौ भगवता बद्धः प्रीतेन सुतले पुनः निवेशितो
धिके स्वर्गादधुनास्ते स्वराडिव १४ गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ऋष्यशृङ्गः पिता
स्माकं भगवान्बादरायणः १५ इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः इदानीमासते राजन्स्वे स्वे
आश्रममंडले १६ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः
१७ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप १८ पारामरी
चिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः १९ आयुष्मतोऽम्बुधारा
यामृषभो भगवत्कला भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः २० दशमो ब्रह्मसावर्णिरुपश्लोकसुतो
महान् तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः २१ तत्रापि जन्म भवति हरेर्विश्वसृजो गृहे विश्वमूर्तिरि
तिविख्यातो येनाप्यायितं जगत् २२

तमेम मन्वंतरे विष्णोः प्रसादाद्देवानां हेलनं बलेरिंद्रपदं हित्वेत्यर्थः १३ रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा १५ इदानीं तत्स्वर
योगतः आसते १६ अद्भुतः इंद्रः १९ २० २१ २२

श्रीः
भा॰अ॰
टी॰
२९

हविष्मत्प्रभृतयस्तत्सुतानामेव केषांचिन्नामान्याह हविष्मानिति विषूच्यां जातः मनुरेकादशम इत्यादिरर्थः तस्य म
नोरंतरं साधयिष्यति ३० सत्यसहसः सूनृतायाश्च सुतः सन् ३१ दिवस्पतेरिंद्रस्य उपहर्ता संपादकः संभविष्यति

हविष्मान्सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः २३ विष्वक्सेनो
विषूच्यां तु शंभोः सख्यं करिष्यति जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः २४ मनुर्वै धर्मसावर्णिरेका
दशम आत्मवान् अनागतास्तत्सुताश्च सत्यधर्मादयो दश २५ विहंगमाः कामगमा निर्वाणरुचयः सु
राः इंद्रश्च वैधृतस्तेषामृषयश्चारुणादयः २६ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः वैधृतायां ह
रेरंशः त्रिलोकीं धारयिष्यति २७ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः देववानुपदेवश्च देवश्रेष्ठा
दयः सुताः २८ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः २९
स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ३० मनुस्त्रयोदशो
भाव्यो देवसावर्णिरात्मवान् चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ३१ देवाः सुकर्मसुत्रामसंज्ञा इं
द्रो दिवस्पतिः निर्मोकतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा ३२ देवहोत्रस्य तनय उपहर्ता दिवस्पतेः यो
गेश्वरो हरेरंशो बृहत्यां संभविष्यति ३३ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति उरुगंभीरबुद्ध्याद्या इंद्रसा
वर्णिवीर्यजाः ३४ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तप
स्विनः ३५ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः वितानायां महाराज क्रियातंतून्वितायिता ३६ रा
जंश्चतुर्दशैतानि त्रिकालानुगतानि ते प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ३७ इति श्रीभाग
वते अष्टमस्कंधे त्रयोदशोऽध्यायः १३ ॥ ॥ ॥

३४ क्रियातंतून्कर्मसंततीः वितायिता विस्तारयिष्यति ३७ युगसहस्रेण पर्ययः परिवर्तो यस्य युगसाहस्रप्रमाण
इत्यर्थः ३८ इति श्रीभावार्थदीपिकायामष्टमस्कंधे त्रयोदशोऽध्यायः ३१

वन्तर्दशेतत्सर्वेषां मन्वादीनां यथायथं पृथक्कर्माणि वर्ण्यंते भगवद्वशवर्तिनां पुरुषेणेश्वरेण यज्ञाद्यवतारैः प्रेर्यंते
नियुज्येते इति तथा तदेवाह २ यज्ञादय इति सृष्ट्यादीनां कर्माण्याह ३, चतुर्युगांत इति चतुर्भिः यतो येभ्यः श्रुति
गणेभ्यः उदिता उक्ताः ४ उक्ताः संयताः सन्तो महीं धर्मं संचारयंति महां धर्मं प्रवर्तयंतीत्यर्थः ५ प्रजापाला मनुपुत्राः
ते धर्मं पालयंति यावन्मन्वंतरावसाने विभागशः पुत्रपौत्रादिक्रमेणा ये चान्ये धारापृथिव्यादयो यज्ञकर्मणि भोक्तेवेना

राजोवाच मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे १ ऋषिरुवा
च मनवो मनुपुत्राश्च मुनयश्च महीपते: इंद्रः सुरगणाश्चैव सर्वे पुरुषशासनाः २ यज्ञादयो याः कथिताः
पौरुष्यस्तनवो नृप मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ३ चतुर्युगांतकालेन ग्रस्तान्श्रुतिग
णान्यथा तपसा ऋषयोपश्यन्यतो धर्मः सनातनः ४ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः युक्ताः सं
चारयंत्यद्धा स्वे स्वे काले महीं नृपाः ५ पालयंति प्रजापाला यावदंतं विभागशः यज्ञभागभुजो देवा ये च
तत्रानुकीर्तिताः ६ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रव
र्षति ७ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ८ सर्गं प्र
जेशरूपेण दस्यून्हन्यात्स्वराड्वपुः कालरूपेण सर्वेषामभवाय पृथग्गुणः ९ स्तूयमानो जनैरेभिर्मायया
नामरूपया विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते १०

न्विताः तैः च सह ६ प्रसंगादूर्ध्वं तैरपि जगद्यात्रा प्रवर्तमानमान ज्ञानमिति द्वाभ्यां सिद्धाः सनकादयः ऋषयः
याज्ञवल्क्यादयः योगेशा दत्तात्रेयादयः तत्रूपः सन् ज्ञानं कर्म च योगं च ब्रूते ८ प्रजेशा मरीच्यादयः तेन रूपेण
सर्वं करोतीति शेषः स्वराड्वपुः राजमूर्तिः सर्वेषामभावाय भवति पृथग्विधा गुणाः शीतोष्णादयो यस्य ९ नामरू
पात्मिकया मायया विमोहितात्मभिरेभिर्जनैर्नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोपि नैव दृश्यत इत्यर्थः
१० ॥

श्री: भा॰स्कं॰ टी॰ ८

प्रासंगिकं निरूप्य प्रस्तुतमुपसंहरति एतत्कल्पविकल्पस्य ॥ इत्यष्टमस्कंधे चतुर्दशोऽध्यायः ॥१४॥ बलिं प्रवृद्ध
श्रीविश्वजिताचार्यमयाजयत् ततोसौ स्वर्गमजयदित्याह देवानिति त्रिभिः ऐश्वर्यं तेन वाध्यायेनवामं वामनचेष्टितं
निग्रहच्छलनाय च बलेर्भूयाननुग्रहः ईश्वरः स्वयं कृपणवत् कस्माद्धेतोरयाचत लब्धार्थोऽपि भूत्वापि तं कस्माद्बबन्ध
॥१॥ तत्र तावद्बलेस्त्रिलोकीमपहृत्य याज्ञावल्कं तत्र वानि निवृत्ते ब्राह्मणाराधनबलेन बलेरकांडएव स्वर्गविजय-
क्रममाह पराजितश्रीरित्यादिना यावदध्यायसमाप्ति पुरन्दरपराजिता श्रीर्येन इन्द्रेण भ्रष्टाभिसृत्या जितः सत्त्व

एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितं यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः ॥ इति श्रीभागवते
अष्टमे चतुर्दशोऽध्यायः ॥१४॥ राजोवाच बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत भूतेश्वरः कृपणव
ल्लब्धार्थोऽपि बबन्ध तं ॥१॥ शुक उवाच पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन्भृगुभिः स जीवितः
सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनिवेदनेन ॥२॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजय
न्विश्वजितात्रिणाकं जिगीषमाणं विधिनाभिषिच्य महाभिषेकेन महानुभावाः ॥३॥ ततो रथः काञ्चनप
ट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥४॥ धनुश्च
दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यं पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शु
क्रः ॥५॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् प्रदक्षिणीकृत्य कृतप्रणामः प्रह्ला
दमामंत्र्य नमश्चकार ॥६॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः

॥ ८ ॥

भृगोर्वंश्यान् शुक्रादीन् महात्मा उदारचित्तः अर्थानां निवेदनेनार्पणेन ॥२॥ त्रिणाकं स्वर्गं जिगीषन्तं विश्वजिता यागे
नायाजयन् महाभिषेकेणैन्द्रेण च हेतुभूतेन ब्राह्मणप्रसिद्धेन ॥३॥ हर्यश्वस्येन्द्रस्य ये तुरंगास्तेषामिव वर्णो हरितो येषां
॥४॥ पुरटं सुवर्णं तूणाविषुधी अरिक्तावक्षय्यशरौ पितामहः प्रह्लादः जलजं शंखं ॥५॥ विप्रैरर्जितः सम्पादितो योधना
र्थो युद्धप्रयोजिकं येन यस्मै तैः स्वकल्पितं स्वस्त्ययनं मंगलवाचनादि यस्य स आमंत्र्य पृष्ट्वा ॥६॥ अथारुह्येति द्वयोरन्वयः सुस्र-

॥ ८ ॥ [illegible] ३०

हेमांगदाभ्यां लसंतौ बाहू यस्याधिरूपस्य सः वनेषु ज्वलितः कुंडस्थः आहवनीय इवेति च ९ तल्पैः सर्वर्तुलक्ष्मी
स्रयेषां तैर्दैत्ययूथपैः वृतो यया विवितिज्वयोरन्वयः परिधीर्दिग्भिः १० स्वहां मतिसमृद्धा ११ धिग्राम्यसत्वं तत्या विधां
पुरीमकस्माद्देवपरित्यजेज्ञादयः पलायिता इति विवरणार्थमिदं पुरीमनुवर्णयति रम्यामिति सार्द्धैरेकादशभिः उ
पवनानि फलप्रधानानि निकटानि वा उद्यानानि प्रधानानि हृदरम्याणि च तैः रम्यां कूजंति विहंगमिथुनानि येषु गायंः
तो मत्तो मधुव्रता येषु १२ प्रवालादीनां उरुभारो येषां ते ताः शाखा येषां ते भ्रमरद्रुमा येषु तैः १३ पयासु सरसे र

हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः । रराज रथमारूढो धिरूपस्य स्वरूपवान् ९ तल्पैः सर्वर्तुव
यःश्रीभिः सम्बद्धैः दैत्ययूथपैः । पिवद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव १० हृत्वा विकर्षन्महतीं
भास्वंतीं ध्वजिनीं विभुः । ययाविंद्रपुरीं स्वाढ्यां कंपयन्निव रोदसी ११ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंद
नादिभिः । कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः । हंस
सारसचक्राह्वकारंडवकुलाकुलाः १३ नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः । आकाशगंगया
देव्या वृतां परिखभूतया १४ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च । रुक्मपट्टकपाटैश्च द्वारैः स्फा
टिकगोपुरैः १५ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मितां । सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युतां
१६ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः १७

विताः प्रमदाः क्रीडंति ताः हंससारसचक्राह्वकारंडवकुलाकुलाः नलिन्यः सरांसि यत्र येषु संति तैः उपवनोद्यानैः रम्यामिति र
पूर्वेणान्वयः किं च परिखाभूतया आकाशगंगया वृतां १४ प्राकारेणाग्निवर्णेन चावृतां साट्टालाः प्राकारोपरि र २
चितास्तुंगस्थानानि गृहस्थानानि तत्सहितानि रुक्मपट्टानि कपाटानि येषु तैर्द्वारैः प्रवेशनैः स्फटिकमयैर्गोपुरैश्च हि
पुरद्वारैर्जुष्टां १५ विभक्ताः प्रपथा राजमार्गा यस्यां सभा उपवेशस्थानानि चत्वराणि अंगणानि रथ्या उपमार्गाः तैरा
ढ्यां समन्यर्बुदं दशकोटयः तैः गणनीयैरनंतैर्विमानैर्युतां १६ वज्रविद्रुममय्यो वेदयो येषु तैः शृंगाटकैः चतुष्पथैः

श्री॰ भा॰ अ॰ टी॰ ३१

नित्यं वयः तारुण्यं रूपं च सौन्दर्यं यासां ताः रूपवन्नार्यः स्वलंकृताः स्त्रियः यत्र यस्यां भ्राजंते १८ सुरस्त्रीणां केशेभ्यः विभ्रष्टानां नवसौगंधिकस्रजां आमोदं १९ हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरप्रिया अप्सरसः २० मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च ध्वजैर्नानापताकायुक्ताभिर्वलभीभिश्च विमानानां उपरिभागैश्च हृतां व्याप्तां वैमानिकस्त्रीणां कलगीतैर्मंगलां २१ उपदेवानां गंधर्वादीनां गीतकैश्च मनोरमां जिताशभासा

यत्र नित्यवयोरूपाः श्यामा विरजवाससः भ्राजंते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः १८ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजां यत्रामोदमुपादाय मार्ग आयाति मारुतः १९ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना पांडुरेण प्रतिच्छन्नमार्गे यांति सुरस्त्रियः २० मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृतां शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां २१ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजेष्टवेणुभिः नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभां २२ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् २३ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्रयोषितां २४ मघवांस्तमभिप्रेत्य बलेः परममुद्यमं सर्वदेवगणोपेतो गुरुमेतदुवाच ह २५ भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २६ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः पिबन्निव मुखेनेदं लिहन्निव दिशो दश २७ दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ओजः सहो बलं तेजो यत एतत्समुद्यमः गुरुरुवाच जानामि मघवन् शत्रोरुन्नतेर

स्त्रीटीमिथिष्ठा वीरेवनायया तां अन्यैरजितप्रभामिति वा पाठांतरे जिता ग्रहाः स्वप्रभया यया २२ यत्तां पृतन्यया सेनया २३ केन हेतुना एवं तेजसा ऊर्जित आसीत् २५ प्रतिव्योढुमपाकर्तुं २६ यतः कारणादेत

पत्रं ३१

ततोचितंमंत्रमाह तस्मादिति त्रिविष्टपम्नस्य निलयमदर्शनंयथास्यात्तथा कालान् २८ केनास्याविपर्ययः स्यादित्यतआह एषइतिविप्राणांबलेनोदर्कः उत्तरोत्तरमधिकंफलंयस्यसः २९ तेषामेवेति।गुरुणार्थःकार्यंयेषां नतिलयंनष्टः एवंशाश्रमितिइपदस्थिरीकृतंमायानयन् अनुव्रतमनुवर्तिनं ३२ द्विजदेवैर्ब्राह्मणैरुपलं भितांप्रापितां ३४ इतिश्रीभावार्थदीपिकायामष्टमस्कंधेपंचदशोध्यायः १५ षोडशेपुत्रनाशेनशोचंत्याअदितेःपतिः

भवद्विधोभवान्वापिवर्जयित्वेश्वरंहरिं नास्यशक्तःपुरःस्थातुंकृतांतस्ययथाजनाः २७ तस्मा
न्निलयमुत्सृज्ययूयंसर्वेत्रिविष्टपं यातकालंप्रतीक्षंतोयतःशत्रोर्विपर्ययः २८ एषविप्रबलो
दर्कःसंप्रत्यूर्जितविक्रमः तेषामेवापमानेनसानुबंधोविनंक्ष्यति २९ एवंसुमंत्रितार्थास्तेगुरुणार्था
नुदर्शिना हित्वात्रिविष्टपंजग्मुर्गीर्वाणाःकामरूपिणः देवेष्वथनिलीनेषुबलिर्वैरोचनःपु
रीं देवधानीमधिष्ठायवशंनिन्येजगत्रयं ३१ तंविश्वजयिनंशिष्यंभृगवःशिष्यवत्सलाः श
तेनहयमेधानामनुव्रतमयाजयन् ३२ ततःतदनुभावेनभुवनत्रयविश्रुतां कीर्तिंदिक्षुवितन्वा
नःसरेजउडुराडिव ३३ बुभुजेचश्रियंस्वृद्धांद्विजदेवोपलंभितां कृतकृत्यमिवात्मानंमन्यमा
नोमहामनाः ३४ इतिश्रीभागवतेऽष्टमस्कंधेपंचदशोध्यायः १५ श्रीशुकउवाच एवंपुत्रेषुनष्टे
षुदेवमाताऽदितिस्तदा हृतेत्रिविष्टपेदैत्यैःपर्यतप्यदनाथवत् १ एकदाकश्यपस्तस्याआश्र
मंभगवानगात् निरुत्सवंनिरानंदंसमाधेर्विरतःचिरात् २ सपत्नींदीनवदनांकृतासनपरिग्र
हः सभाजितोयथान्यायमिदमाहकुरूद्वह ३ अप्यभद्रंनविप्राणांभद्रेलोकेऽधुनागतं नधर्म

प्रार्थितःकश्यपःप्राहपयोव्रतमितीर्यते इदानींवामनावतारप्रसंगमाह एवमित्यादियावदध्यायसमा
प्तिनष्टेषुअदृष्टेषुसत्सु १ तत्रकश्यपःपत्नीमिदमाह ३ दीनवदनत्वादिचिह्नमालक्ष्यबहुधाविकल्पयन्पृ
च्छति अप्यभद्रमितिसप्तभिः हेभद्रेशुभेलोकेऽस्मिन्कालेअधुनावर्तमानेइतितथाप्य
भवप्रवर्तितानानर्थस्यानाधेः ४ ॥

हे गृहमेधिनि अपि वा किं वा गृहेषु धर्मादेः किंचित् अकुशलमिति काक्वा प्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः
स्वधर्मादिना योगफलं भवति ५ किं वा त्वया अपूजिता एव गृहाद्याताः ६ नार्चिताः संतो निर्गच्छंतीति फेरुराजः
शृगालः नाथः तदीयविवरतुल्याः ७ वेलायां होमकाले कर्हिचित् न हुताः ८ किं भवत्या आत्मानमस्वस्थं अप्रहृ
ष्टं लक्षणैर्म्लानस्नानादिभिर्लक्षयामि १० अस्वास्थ्यकारणमन्यदस्तीति वक्तुं नष्टमभद्रादिकं नास्तीत्याह

अपि वाकुशलं किंचिद्गृहेषु गृहमेधिनि धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ५ अपि वातिथ
योभ्येत्य कुटुंबासक्तया त्वया गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ६ गृहेषु येष्वतिथयो ना
र्चिताः सलिलैरपि यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ७ अप्यग्नयस्तु वेलायां न हुता हविषा
सति त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ८ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ब्रा
ह्मणोग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ९ अपि सर्वे कुशलिनः तव पुत्रा मनस्विनि लक्षयेस्वस्थमा
त्मानं भवत्या लक्षणैरहं १० अदितिरुवाच भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च त्रिवर्गस्य परं क्षेत्रं
गृहमेधिन्गृहा इमे ११ अग्नयोतिथयो भृत्या भिक्षवो ये च लिप्सवः सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रि
ष्यति १२ को नु मे भगवन्कामो न संपद्येत मानसः यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते १३ तवैव
मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं
भजते महेश्वरः १४ तस्मादीश भजंत्या मे श्रेयः चिंतय सुव्रत हृतश्रियो हृतस्थानात्सपत्नैः पाहि
नः प्रभो १५ परैर्विवासिता साहं मग्ना व्यसनसागरे ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम १६

भद्रमिति द्वाभ्यां इमे गृहास्त्रिवर्गस्य परं क्षेत्रं उद्भवस्थानं त्रिवर्गोपि यच्छा वहद्धर्तव्यः अर्थः भगवतस्तवानुध्या
नेन यत्नमया क्रियते तस्मात् अग्नयोतिथयः स्मादि सर्वं न रिष्यति न हीयते ११ पूर्वे टीका १२ प्रस्तुते विज्ञापयति
को न्विति १३ संपद्येत कामः समाहृतवैवेति चतुर्भिः १४ सपत्नैर्दैत्यैर्हृताः श्रीर्येषां हृते स्थानं येषामिति उभयत्र अभि
प्रायेण बहुवचनम् १६

कश्यपः प्रथमं तावत्सुतस्त्वं हि हेत्वा जयिनं विस्मयमानेन त्वमुपदिशसि अहो इतिमानेन १८ अपरित्यक्तौ
प्रत्याह उपतिष्ठस्वेति ताभ्यां २१ ननु एवं भूतं कामप्रासि हे तवैवनो नरप्रसिद्धानताह अमोघेति २२ य
थाराममनोरथं विदधात् २३ यथा च मे आशु त्वन्मयानि तथा न त्वेवा प्रकारमुपदिश २४ मयाप्रेष्टः पद्मजो मे

यथा तानि पुनः साधो प्रपश्येरन्नमात्मजाः तथा विधेहि कल्याणं धिया कल्याणकृत्तम १७ क-
श्यप उवाच एवमभ्यर्थितो ऽदित्या कस्तामाह स्मयन्निव अहो मायाबलं विष्णोः स्नेहबद्धमिदं ज-
गत् १८ क्व देहो भौतिको ऽनात्मा क्व चात्मा प्रकृतेः परः कस्य के पतिपुत्राद्या मोह एव हि कारणम् १९ उपतिष्ठस्व
पुरुषं भगवन्तं जनार्दनम् सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् २० स विधास्यति ते कामान्हरिर्दीनानुकम्प-
नः अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम २१ अदितिः केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम्
यथा मे सत्यसंकल्पो विदध्यात्स मनोरथम् २२ आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् आशु तुष्यति मे देवः सी-
दन्त्याः सह पुत्रकैः २३ कश्यप उवाच एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः यदाह ते प्रवक्ष्यामि व्रतं केशव-
तोषणम् २४ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः अर्चयेदरविन्दाक्षं भक्त्या परमयान्वितः २५ सिनी-
वाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् २६ त्वं देव्यादिवराहेण
रसायाः स्थानमिच्छता उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय २७ निर्वर्तितात्मनियमो देवमर्चेत्स-
माहितः अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि २८

मेयव्रतमाह तत्ते प्रवक्ष्यामीत्यन्वयः २५ अमले शुक्ले तत्रादौ पूर्वैर्दिवसैः कृत्यमाह २६ ब्रह्मचार्यथ तद्वाग्रां ड्रत्ये
तेन ग्रन्थेन यदि लभ्येत क्रिक्रोडविदीर्णया यावराहोत्खातया लिप्यतनमेनः त्वं देवीति २७ त्वं देवीति मन्त्रे हे देवि त्वं रसाया
उद्धृता २७ निर्वर्तित आत्मनियमो नित्यनै
मित्तिको येन २८ २८

तत्रावाहनादौ नवमंत्रानाह नमस्तुभ्यमिति २९ पाद्यादौ विशेषणस्तस्मादष्टानांर्थवद्याति चतुर्विंशतिगुणा :
तत्त्वानि तानि जानातीति तज्ज्ञस्तस्मै तथा गुणानां संख्यानस्य हेतवे सांख्यप्रवर्तकाय ३० एवं सामान्यतो नत्वावतारांश्च
णमहति त्रिभिः मंत्रादौ मंत्रोक्तयज्ञरूपेण विष्णोः प्रणामो न मह्ति द्वे शीर्षे यस्य त्रयः पादा यस्य तेनैव फलविस्ता
रकाय त्रयीविद्यायामात्मा यस्येति त्रिधाबद्धस्य स्पार्थ उक्तः तथाच मंत्रः चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे
सप्तहस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेशेति मार्गामद्भवदात्मनः सोयेयस्तैर्थ्या।

नमस्तुभ्यं भगवते पुरुषाय महीयसे सर्वभूतनिवासाय वासुदेवाय साक्षिणे २९ नमोव्यक्ताय सू
क्ष्माय प्रधानपुरुषाय च चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ३० नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगा
य तंतवे सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ३१ नमः शिवाय रुद्राय नमः शक्तिधराय च
सर्वविद्याधिपतये भूतानां पतये नमः ३२ नारायणाय ऋषये नराय हरये नमः नमो हिरण्यग
र्भाय प्राणाय जगदात्मने ३३ नमस्ते आदिदेवाय साक्षिभूताय ते नमः योगैश्वर्यशरीराय नम
स्ते योगहेतवे ३४ नमो मरकतश्यामवपुषेधिगतश्रिये केशवाय नमस्तुभ्यं नमस्ते पीतवाससे
३५ त्वं सर्ववरदः पुंसां वरेण्यो वरदर्षभः अतस्ते श्रेयसे धीराः पादरेणुमुपासते ३६ अन्ववर्त
न्त यं देवाः श्रीश्च तत्पादपद्मयोः स्पृहयंत इवामोदं भगवान्मे प्रसीदतां ३७ एतैर्मंत्रैर्हृषीकेशमा
वाहनपुरस्कृतं अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ३८

विष्णुस्त्वयज्ञरूपेण स्तूयते तेनेम तत्त्वतः तथा च यास्कः चत्वारि शृंगेति वेदा एवोक्ताः त्रयो अस्य पादा इति सवना
नि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्ताः सप्त छंदांसि त्रिधा बद्धः त्रेधा बद्धो मंत्रब्राह्मणकल्पैः वृषभो रोर
वीति रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसंति यजुर्भिर्यजंति सामभिः स्तुवंतीति
३१ प्राणाय सूत्रात्मने योगैश्वर्यं शरीरं यस्य ३४ अधिगता प्राप्ता श्रीः येन तस्मै तत्पादपद्मयोरामोदं स्पृहयंत इव
३६ देवाः श्रीश्च यमनुवर्तंते स मे प्रसीदतु ३७ आवाहनेन पुरस्कृतं सम्मानितम् ३८

पयसि शृतं पक्वं पायसं ४० मूलविद्यया द्वादशाक्षरेणैव ४१ सर्वैर्ज्ञातिभिरन्याभिश्च स्तुतिभिः ४२ तस्य शेषं निर्माल्यं
ह्रीं प्रवदैर्येऽयं तान्नमस्ते संभवे द्वावपि भोजयेदित्यर्थः सभाजितैः तैरनुज्ञातः सन् शेषं बन्धुभिः सहितः ४३ तस्यां रा

पुष्पविज्ञानगन्धमाल्याद्यैः पयसा स्नापयेद्विभुं वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ३९ गन्धधूपादि
भिश्चार्चेद्द्वादशाक्षरविद्यया शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ४० ससर्पिः सगुडं दत्त्वा जुहुयान्मूल
विद्यया निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयं ४१ दत्त्वाचमनमर्चित्वा ताम्बूलं च निवेदयेत् जपेदष्टोत्त
रशतं स्तुवीत स्तुतिभिः प्रभुं ४२ कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा कृत्वा शिरसि तच्छेषं देवमुद्वास
येत्ततः ४३ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं भुञ्जीत तैरनुज्ञातः सेष्टः शेषं समाहितः ४४ ब्रह्म
चार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ४५ पयसा स्नापयित्वा
र्चयेद्यावद्व्रतसमापनं पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः ४६ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भो
जयेत् एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ४७ हरेराराधनं होमं मर्हणं द्विजतर्पणं प्रतिपद्दिनमार
भ्य यावच्छुक्लत्रयोदशी ४८ ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् वर्जयेदसदालापं भोगानुच्चावचां
स्तथा ४९ अहिंस्रः सर्वभूतानां वासुदेवपरायणः त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ५० का
रयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ५१ ॥ चरुं निरू
प्य पयसि शिपिविष्टाय विष्णवे सूक्तेन तेन पुरुषं यजेत सुसमाहितः ५२ नैवेद्यं चातिगुणवद्दद्यात्पुरुष
तुष्टिदं आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ५३ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः भोज
येत्तान्गुणवता सदन्नेन शुचिस्मिते ५४ अन्यांश्च ब्राह्मणान्शक्त्या ये च तत्र समागताः दक्षिणां गुरवे
दद्यादृत्विग्भ्यश्च यथार्हतः अन्नाद्येनाश्वपाकांश्च प्रीणयेत्समुपागतान् ५५

त्र्यां ब्रह्मचारी सन् श्वोभूते प्रभाते सति ४५ पयसैव भक्ष्याहारो यस्य ४६ अधःस्वप्नं शयनं ४७ पञ्चकैः पञ्चामृतैः

श्री·
भा·अ·
स्कं·
२४

मयाविनेभवत्याः समुदाहृतं ५८ सर्वयज्ञाख्योऽयंयतः सर्वंव्रतमितिवस्तुतमेतदुक्तं ६० इतिश्रीभागवा
तेअष्टमस्कंधेषोडशोऽध्यायः १६ ततः सप्तदशेऽदित्याहृतंनैतंस्मितंव्रतेनहरिः तत्कामश्रणायादेतस्तुत्रोद्भूद्वितीयेन

भज्ञावन्त्स्वसर्वेषुदीनानांपद्मपलोषुव विलोसत्वीयाननंविद्वान्भुंजीतसहबंधुभिः ५६ नृत्यवादित्र
गीतैश्चस्तुतिभिःस्वस्तिवाचकैः कारयेत्तत्कथाभिश्चपूजांभगवतोऽन्वहं ५७ एतत्पयोव्रतं
नामपुरुषाराधनंपरं पितामहेनाभिहितंमयातेसमुदाहृतं ५८ त्वंचानेनमहाभागेसम्यक्चीर्णे
नकेशवं आत्मनाशुद्धभावेननियतात्माभजाव्ययं ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिश्रुतं
तपःसारमिदंभद्रेदानंचेश्वरतर्पणं ६० तएवनियमाःसाक्षात्तएवचयमोत्तमाः तपोदानंव्रतंय
ज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रयताश्रद्धयाचर भगवान्परितुष्टस्तेवरानाशुविधास्य
ति ६२ इतिश्रीभागवतेअष्टमस्कंधेषोडशोऽध्यायः १६ शुकउवाच इत्युक्तासादितीराजन्स्वभ
र्त्राकश्यपेनवै अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयंत्येकयाबुद्ध्यामहापुरुषमीश्वरं प्र
गृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुद्ध्याभगवत्यखिलात्मनि वासुदेवेसमा
धायचचारहपयोव्रतं ३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः पीतवासाश्चतुर्बाहुःशंखचक्रगदा
धरः ४ तंनेत्रगोचरंवीक्ष्यसहसोत्थायसादरं ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धां
जलिरीडितुंस्थितानोत्सेहआनंदजलाकुलेक्षणा बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्यु
त्सवगात्रवेपथुः ६ ॥

प्रीतिविह्वलत्वादेवबद्धांजलिसतीस्थिता केवलमीडितुंस्तोतुं नोत्सेहेनशशाकअपितुतूष्णींबभूवकथंभू
ता आनंदजलेनाकुलेईक्षणेयस्याः पुलकैराकुलाआकृतिर्देहोयस्याः तस्यदर्शनेनयोत्सवस्त
वः तेनगात्रवेपथुःकंपोयस्याः ६ ॥

राम·
२४

नष्टावेसमतिर्वोद्गीत्वमाणोति च क्रियाभेदान्मेत्यस्य पदस्याह्निरुत्ते व दोषः अयत्नतो विनिर्जितभक्तानामूर्जितानपि
भक्तान्यूर्वातितमीशमन्तमित्यस्तोदृष्टति त्रिभिः ७ यज्ञेश्वरत्यादिदशभिः संबोधनैः तवाशक्यं किमपि नास्तीति व
दंतीप्रार्थयंते शंनः कृधि कृपयेतो दीनानाथो यासि वंतीर्थश्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य
आपन्नानां शरणागतानां लोकानां वृजिनोपशमाय उदयो यस्य ८ भूम्ने महते नमः महते हेतवः विश्वाय विश्व
भवनस्थितिसंयमनार्थं स्वैरं गृहीताः पुरुशक्तेर्मायायाः गुणा येन तस्मै तथापि स्वस्थाय अप्रच्युतस्वरूपाय ऊतः

प्रीत्या शनैर्गद्गदया गिराहरिं तमेवमादेव्यदितिः कुरूद्वह उद्वीक्षती सापिवतीव चक्षुषा रमापतिं
यज्ञपतिं जगन्मयं ७ अदितिः यज्ञेशयज्ञपुरुषाच्युततीर्थपाद तीर्थश्रवः श्रवणमंगलनामधे
य आपन्नलोकवृजिनोपशमोदयाद्य शंनः कृधीश भगवन्नसि दीननाथः ८ विश्वाय विश्वभवनस्थि
तिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे ह
रये नमस्ते ९ आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः ज्ञानं च केवल
मनंत भवति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः १० शुक उवाच अदित्यैवं स्तुतो राजन्भगवान्पु
ष्करेक्षणः क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ११ श्रीभगवानुवाच देवमातर्भवत्या मे विज्ञातं चिर
काङ्क्षितं यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः १२ ॥

शश्वदुपबृंहितः नित्योर्जितो यः पूर्णो बोधः तेन व्यापादितं निरस्तं आत्मनि तमो मायालक्षणं येन तस्मै ९ अस्म
दीयमनोरथपूरणमीषत्करमेव तवेति किमुत कथ्यायेनाह आयुः परं ब्रह्मायुः पुनरपि द्यौः स्वर्भूः स्वर्गस्तलं च योर्भू
रसाः द्यौरितिष्टपाठे भूः स्वर्गसाववलिस्वर्गादिति विग्रहः रसेति पाठे त्रीणि पदानि सकलायोगगुणाः अणिमाद्यः
१० क्षेत्रज्ञः अंतर्यामी ११ सपत्नैर्हृता श्रीर्येषां स्वधामतः च्यावितानां च पुत्राणां संबन्धि यत्त्वद्भवत्याः चिरमाकाङ्क्षि
तं मया ज्ञातम् १२ ॥

श्री॰
भा॰ पु॰
टी॰
२५

कोटिनमेवाहमानितिविभिः प्रतिलब्धोजयश्रीश्रियैः तेपुत्रैः सहरूपासितंएकत्रस्थातुमिच्छसि १३ प्रत्या
हृतेयथाश्रीश्रियैःताव १४ अपारणीयाअनतिक्रमणीयाः यद्यस्मादवकूलईश्वरः कालोयेघातेविप्रैःगु
नारहिताः अनुकूलैरीश्वरैः समर्थैःविप्रगुणाइतिवा १६ ममममयाचिंत्यपवतत्रहेतुः संतोषितस्तस्मादिश्रहाख
त्रर्पंरक्षानुमारेणफलहेतवात् १७ मारीचस्यतपमिश्रधिष्ठायस्थितः मनुगोत्नाम्मिपालयिष्यामि १८ अवः

तान्विनिर्जित्यममेरङ्गमंदानसत्वर्षभान् प्रतिलब्धजयश्रीभिःपुत्रैरिच्छस्युपासितं १३ इंद्रज्येष्ठैः
स्वतनयैर्हृतानांयुधिविद्विषां स्त्रियोरुदतीनामाधइहमिच्छसिरुःखिताः १४ आत्मजान्सुसमृ
द्धान्त्वंप्रत्याहृतयशःश्रियः नाकपृष्ठमधिष्ठायक्रीडतोद्रष्टुमिच्छसि १५ प्रायोधुनातेसुरयूथना
थाअपारणीयाइतिदेविममतिः यत्तेनुकूलेश्वरविप्रगुप्तानविक्रमस्तत्रसुखंददाति १६ तेथा
प्युपायोममदेविचिंत्यः संतोषितस्यव्रतचर्ययाते ममार्चनंनार्हतिगंतुमन्यथाश्रद्धानुरूपंफल
हेतुकत्वात् १७ त्वयार्चितःचाहमपत्यगुप्तयेपयोव्रतेनानुगुणंसमीडितः स्वांशेनपुत्रत्वमुपे
त्यतेसुतान्गोप्तास्मिमारीचतपस्यधिष्ठितः १८ उपधावपतिंभद्रेप्रजापतिमकल्मषं मांचभाव
यतीपत्यावेवंरूपमवस्थितम् १९ नैतत्परस्माआख्येयंपृष्टयापिकथंचन सर्वंसम्पद्यतेदेवि
देवगुह्यंसुसंवृतम् २० शुकउवाच एतावदुक्त्वाभगवांस्तत्रैवांतरधीयत अदितिर्दुर्लभंलब्ध्वा
हरेर्जन्मात्मनिप्रभोः २१ उपधावत्पतिंभक्त्यापरयाकृतकृत्यवत् सवैसमाधियोगेनकश्यपस्तद
बुध्यत प्रविष्टमात्मनिहरेरंशामवितथेक्षणः सोदित्यांवीर्यमाधत्ततपसाचिरसंभृतं २२ स॰

पतिमुपाधावभजस्व १९ देवानांगुह्यंरहस्यंसर्वंसुसंवृतंगुप्तंसत्संपद्यतेसिद्ध्यति २० प्रभोर्हरेरात्मनि
जन्मलब्ध्वा २१ अवितथमीक्षणंदृष्टिर्यस्यसः २२ अग्निर्यथासर्वत्रसमोपिदारुणिसंघर्षणेनदाह्या
केअग्निमाधत्तेएवंस्वयंपुत्रेषुसमोपिदेवपत्न्यपत्यंवीर्यमाधत्तेत्यर्थः धिष्ठितमधिष्ठायस्थितं २४

अ

समीहेनेत्यावेत्यर्थः २५ अदितेरेवपूर्वस्मिन्जन्मनिपृश्निरितिनामतस्यागर्भायअर्भकायवेदगर्भाययस्ययद्वा
वेदानांगर्भायवेदेषुप्रकाशमानायेत्यर्थः त्रयोलोकानाभौयस्यतस्मै त्रिनाभस्तस्मै त्रयाणांलोकानांपृष्ठे
परिस्थितायशिपिविष्टेनपशवोजीवाःतेष्वंतर्यामितयाप्रविष्टाय यज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवप
शुषुप्रतितिष्ठतीतिश्रुतेः यद्वाशिपयोरश्मयःतैर्विष्टितायेत्यर्थः तथापिविश्वव्यापिने २७ अंतः
पतितंतृणादियथागंभीरंस्रोतआक्षिपतिआकर्षतितथाकालात्माभवान्विश्वमाक्षिपति २८ संभवि

हिरण्यगर्भोविज्ञायसमीडेगुणनामभिः २५ ब्रह्मोवाच जयोरुगायभगवन्नुरुक्रमनमोऽ
स्तुते नमोब्रह्मण्यदेवायत्रिगुणायनमोनमः २६ नमस्तेपृश्निगर्भायवेदगर्भायवेधसे त्रि
नाभायत्रिपृष्ठायशिपिविष्टायविष्णवे २७ त्वमादिरंतोभुवनस्यमध्यमनंतशक्तिंपुरुषंयमा
हुः कालोभवानाक्षिपतीशविश्वंस्रोतोयथांतःपतितंगभीरं २८ त्वंवैप्रजानांस्थिरजंगमानां
प्रजापतीनामपिसंभविष्णुः दिवौकसांदेवदिवश्च्युतानांपरायणंनौरिवमज्जतोप्सु २९ इति
भागवतेअष्टमेसप्तदशोध्यायः १७ शुकउवाच इत्थंविरिंचिस्तुतकर्मवीर्यःप्रादुर्बभूवामृतभूर
दित्यां चतुर्भुजःशंखगदाब्जचक्रःपिशंगवासानलिनायतेक्षणः १ ॥

ष्णुरुत्पादनशीलोसिअयंभावःनह्येवंभूतस्यतवजन्मादिसंभवःकिंतुदेवानांप्रजापतीनांपरमाश्रयत्वेनतत्का
र्यसाधनायअवतारोयंअतःनान्यगतीनस्मानःसर्वानाप्याययेति २९ इतिभावार्थेअष्टमेसप्तदशः १७ ततः
त्वष्टादशेभूत्वावामनःसन्क्रतौबलेः यज्ञंगतोबलेस्तेनसत्कृत्योक्तोवरान्वृणु इत्थंविरिंचिनस्तुतंकर्मवी
देवकार्यलक्षणंवीर्यंचप्रभावोयस्यसहरिरदित्यांप्रादुर्बभूवेतित्रयाणामन्वयः अमृतभूर्मृत्युजन्मशून्यःशं
खगदाब्जचक्राण्यस्यसंतीतितथाअर्शआदित्वेनमत्वर्थीयोअच्प्रत्ययः अविसर्गपाठेसचासौपिशंगवासा स्त्र १

श्री॰
भा॰ द्र॰
टी॰
३९

ऊषघजो मकरः तदाकारयोः कुंडलयोः त्विषा उल्लसंती श्रीवदनांबुजे यस्य श्रीवत्सो वक्षसि यस्य वलयैरंगदैः
श्च महोल्लसंति किरीटादीनि यस्य १ श्रीवत्स्या वनमालया विराजतो वेश्मगतं तमः ३ अग्निजिह्वा देवान॰
गाः पर्वताः तस्याद्भावसमयमाह ४ श्रोणायामिति भाद्रपदस्य कृष्णद्वादशी श्रवणद्वादशीति प्रसिद्धा न॰
त्रापि श्रोणायां श्रवणास्थे चंद्रे इत्यर्थः तत्रापि श्रवणास्य प्रथमांशे अभिजिन्नक्षत्रे तन्नक्षत्रपादर्शिते अभिजि

घृणामावृदातो ऊषधाजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् श्रीवत्सवक्षा वलयांगदोल्लस॰
किरीटकांचीगुणचारुनूपुरः १ मधुव्रतव्रातनिघुष्टया स्वया विराजितः श्रीवनमालया हरिः
प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठविनिष्टकौस्तुभः ३ दिशः प्रसेदुः सलिलाशयास्त
दा प्रजाः प्रहृष्टाः ऋतवो गुणान्विताः द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजा मे जहृषुर्नगाश्च ४
श्रोणायां श्रवणद्वादश्यां मुहूर्तेभिजिति प्रभोः सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ५
द्वादश्यां सवितातिष्ठन्मध्यंदिनगते नृप विजयानाम सा प्रोक्ता यस्यां जन्म मुरद्विषः शंखदुंदुभ॰
यो नेदुर्मृदंगपणवानकाः चित्रवादित्रतूर्याणां निर्घोषस्तुमुलो भवत् ७

त्रामनक्षत्रे उपविष्टादशाद्धानां अधस्तात् श्रोणायामिति एवं विशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः किंच
नक्षत्राण्यश्विन्यादीनि ताराश्चाद्वैनतारा गुरुशुक्रादयः ते ग्राद्या ये चान्ये ते ग्रहा अपि सर्वे तस्य जन्म दक्षिणम्
दानं चक्रुः जन्ममुहूर्ते गुणा बहवो बभूवुरित्यर्थः ५ विशेषांतरमाह यस्यां द्वादश्यां हरेर्जन्म तत्र स्याह॰
सेवविदुः तदा च मध्यंदिनगतः सविता तिष्ठन् सा च द्वादशी विजया नाम प्रोक्ता इत्यन्वयः ६ शंखदुंदुभयो ये

मानवा इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ८ विस्मयांतरमाह यत्तद्वपुर्हरिरधारयत् प
कटितवान् तेनैव वपुषा मातापित्रोः संपश्यतोरेव वामनो वटुर्बभूव दिव्यगतिरद्भुतचेष्टितः स्वयं कथंभूतः
अव्यक्तः चिद्रूपः कथमधारयत् भासीभिर्विभूषणानि च आयुधानि च तैर्व्यक्तं यथा भवति तथा १२ कर्माणि

प्रीताश्चाप्सरसो नृत्यं गंधर्वश्रवराजगुः तुष्टुवुर्मुनयो देवा मानवाः पितरोऽग्नयः ८ सिद्धविद्याधरग
णाः सकिंपुरुषकिन्नराः चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ९ गायंतोऽतिप्रशंसंतो नृत्यंतो
विबुधानुगाः अदित्या आश्रमपदं कुसुमैः समवाकिरन् १० दृष्ट्वादितिस्तं निजगर्भसंभवं परं
पुमांसं मुदमाप विस्मिता गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ११ यत्तद्व
पुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः बभूव तेनैव स वामनो वटुः संपश्यतोर्दिव्यग
तिर्यथा नटः १२ तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिं
१३ तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् १४ द
दौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः १५ कमंड
लुं वेदगर्भः कुशान्सप्तर्षयो ददुः अक्षमालां महाराज सरस्वत्यव्ययात्मनः १६ तस्मा इत्युपनीता
य यक्षराट् पात्रिकामदात् भिक्षां भगवती साक्षादुमादादंबिका सती १७ स ब्रह्मवर्चसेनैवं सभां सं
भावितो वटुः ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः १८ समिद्धमाहितं वह्निं कृत्वा परिसमू
हनं परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः १९ ॥

जातकर्मादीनि १३ वनस्पतिर्वनानां पतिः सोमः १५ पात्रिकां भिक्षापात्रीं १७ स एवं संभावितो वटुः ब्रह्मर्षि
गणसंजुष्टां तां सभामतिक्रम्यारोचत १८ ॥ ॥

श्रीः
भा॰पु॰
टी॰
३२

यदर्थं बह्मार्थं भूवनदाह इत्यादियावदध्यायसमाप्ति यजमानं यजन्तं भृगूणां भृगुभिः उपकल्पितैः प्रवर्ति
तैरविकलेन साद्गुण्येन बलेन संभृतैः परिशर्णाः २० नर्मदायाउत्तरेतटे भृगुकच्छसंज्ञके देशेक्रतूत्तमं प्रवर्तयन्तो यज्ञेत्य्व॰
लेन्त्विजोभृगवः तेतेवामनं यजन्तं आरात् समीपं उदितं रविमिवंतेक्षन्त सदयः सूर्यः सूर्यः किं॰

इत्यश्वमेधे यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः जगामतत्राखिलसारसंभृतो भारेण
गां सन्नमयन्पदे पदे २० तं नर्मदायास्तटउत्तरे बलेर्यऋत्विजस्ते भृगुकच्छसंज्ञिते प्रवर्तयन्तो भृग
वः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविं २१ ते ऋत्विजो यजमानाः सदस्या हतत्विषो वामनतेजसा
नृप सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोथ दिदृक्षया क्रतोः २२ इत्थं सशिष्येषु भृगुष्वने
कधा वितर्क्यमाणो भगवान्स वामनः सदण्डं छत्रं सजलं कमण्डलुं विवेश बिभ्रद्धयमेधवाटं २३ मौं
ज्या मेखलया वीतमुपवीताजिनोत्तरं जटिलं वामनं विप्रं मायामाणवकं हरिं २४ प्रविष्टं वीक्ष्य
भृगवः सशिष्यास्ते सहाग्निभिः प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा २५ यजमानः प्रमुदि
तो दर्शनीयं मनोरमं रूपानुरूपावयवं तस्मा आसनमाहरत् २६ स्वागतेनाभिनंद्याथ पादौ भगव
तो बलिः अवनिज्यार्चयामास मुक्तसंगमनोरमं २७ तत्पादशौचं किल कल्मषापहं स धर्मविन्मू
र्ध्न्यदधात्सुमंगलं यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या २८ बलिरुवाच स्वा
गतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरम् २९ ॥

लक्षणं एवमादिवितर्कयन्निति शेषः हयमेधवाटमश्वमेधमंडपं विवेश २३ उपवीताजिने उपवीतं धृतमजिन
मेव उत्तरं उत्तरीयं यस्य २४ संक्षिप्ताः अभिभूताः संतः २५ रूपस्यानुरूपा अवयवा यस्य तं दृष्ट्वेति शेषः २६ चंद्र
मौलिश्चासौ गिरिशश्चेति गिरिशयार्थे चकारः चंद्रमौलिरपि गिरिशः यं मूर्ध्ना दधार समर्थः २८

वेद्यार्थतावां मालान्वयमल्लं ब्रह्मचारीणं तपपवमल्पेकथ्यं भूतः तपः वपुर्धरं मूर्तिधारि २९ वद्यूरणावनेजनैर्वार्भि
मलैर्हतमंहोदुष्कृतं मस्यमे पुनीतापवित्रीकृता ३१ मेमत्रः प्रतीच्छगृहाणे हेयूर्हनमश्नुवतम ३३ इति श्रीभाग
वतेऽष्टमस्कंधेऽष्टादशोऽध्यायः १८ कुलविशेषान हृतिगणयाचितनपदत्रयं प्रतिश्रुते ववलिना जानन्भृगुरवा
रयत् दातः सकृतिः स्वयंतव्यतिरित्यादि प्रसन्नेनावितं बज्जमिति भिदेवलाशिवयन्नाह वामनः ववसवेतदिति

अद्यनः पितरः तृप्ता अद्यनः पावितं कुलं अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ३० अद्याग्नयो मे
सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः प
दैस्तव ३१ यद्यद्बटो वाञ्छसि तत्प्रतीच्छ मेवामर्थिनं विप्रसुतानुतर्कये गां काञ्चनं गुणवद्धाम धाम
मृष्टं तथान्नपेयमुत वा विप्रकन्यां ३२ ग्रामान्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ३३
इति भागवते अष्टमे अष्टादशोऽध्यायः १८ शुक उवाच इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं
निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् १ श्रीभगवानुवाच वचस्तवैतज्जनदेव सूनृतं कुलोचि
तं धर्मयुतं यशस्करं यस्य प्रमाणं भृगवः साम्पराये पितामहः कुलवृद्धः प्रशान्तः २ न ह्येतस्मिन्कु
ले कश्चिन्निःसत्त्वः कृपणः पुमान् प्रत्याख्याता प्रतिश्रुत्य यो वादाता द्विजातये ३ न सन्ति तीर्थे युधि वा
र्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः ख
वेः ४ ॥

सोऽदृशाभिः हे जनदेव सांपराये पारलौकिके धर्मे पितामहश्च प्रह्लादः प्रमाणं २ निःसत्त्वः स्वल्पदक्षिणो यो द्विजात
ये याचकाय प्रत्याख्याता न ददामीति वक्ता कृपणः स्वल्पदः प्रथमं प्रतिश्रुत्य यो वा न ददातीति तादृशो न च ब्राह्मणेभ्यः
प्रतिश्रुत्य यो न धनेन बाधमः तत्कौत्र कुले न सन्ति स्वल्पेत्युदेद दत्वा प्रत्याख्यातारः कौतिः ३ तीर्थदानं तीर्थदाना न मे इयमस्पृष्टमा
कुले ४ यतः यस्मिन्कुले जातः ५ हिमाद्यादेर्मन्याद्भवराणे इत्यत्तु तत्रवीदयम् यद्धिरण्याद्यं कद्रुणं जित्वा भु

वउद्धारेहननेसतिविस्मयात्मानंजयिनंमेनेनतद्वीर्यंभूरिविष्णुपराक्रमं स्मरन् ६ पराग्दृशःबहिर्दृष्टेःप्रतीपहृद
येस्थितंमामेवंज्ञास्यतीत्येवंनिश्चित्य ९ श्वासानिलेनान्तर्हितःसूक्ष्मोदेहोयस्यविविशमतिकंपितेनचेतोय
स्यसतंकंपितेनचित्तेनइतिवाल्लवार्थः १० तद्दर्शनेनःप्रविष्टत्वात् ११ भ्रमान्यतःसकाशात्तत्रावर्ततेनदृश्यसेवा
नूनंगतःनित्यशुद्धत्वादितिवाल्लवार्थः १२ एवंभूतस्यपर्यन्तमस्वेकंजीवितमेवैरंयत्तत्कृतवान् नतुचितमेतस्य
प्रतिदेहमहाबलपराक्रमस्यस्तुरेहेमानविजृंभितक्रोधावेवेधस्य कथंनामासोस्तुराशिरोमणिःजीवन्मोचका

पत्नोज्ञाजोहिरण्याक्षःचरन्नेकइमांमहीं प्रतिवीरंदिग्विजयेनाविंदतगदायुधः ५ यंविनिर्जि
त्यहकृच्छ्राद्विष्णुःक्ष्मोद्धारआगतं नात्मानंजयिनंमेनेतद्वीर्यंभूर्यनुस्मरन् ६ निशम्यतद्वधंभ्रा
ताहिरण्यकशिपुःपुरा हन्तुंभ्रातृहणंक्रुद्धोजगामनिलयंहरेः ७ तमायान्तंसमालोक्यशूलपा
णिंकृतान्तवत् चिन्तयामासकालज्ञोविष्णुर्मायाविनांवरः ८ यतोयतोहंतत्रासौमृत्युःप्राणभृ
तामिव अतोहमस्यहृदयंप्रविशामिपराग्दृशः ९ एवंसनिश्चित्यरिपोःशरीरमाधावतोनिर्
विविशेसुरेन्द्रः श्वासानिलान्तर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेणविविग्नचेताः १० सतन्निकेतंपरिमृ
श्यशून्यमपश्यमानःकुपितोननाद क्ष्मांद्यांदिशःखंविवरान्समुद्रान्विष्णुंविचिन्वन्नददर्शवीरः
११ अपश्यन्नितिहोवाचमयान्विष्टमिदंजगत् भ्रातृहामेगतोनूनंयतोनावर्ततेपुमान् १२ वैरानु
बंधएतावानामृत्योरिहदेहिनां अज्ञानप्रभवोमन्युरहंमानोपबृंहितः १३ पिताप्रह्लादपुत्रस्ते
तद्विद्वान्द्विजवत्सलः स्वमायुर्द्विजलिंगेभ्योदेवेभ्योदात्सयाचितः १४ भवानाचरितान्धर्मानास्थि

तदेहेरक्षेपिदीनवानित्याशयेनाह अज्ञानेतिदृन्देः प्राकृपोरुषत्यागोमार्गधर्मवेत्यर्थः १३ तदेवंपूर्वजान्स्ता
त्यानपितरौस्तौतिद्विजवेशधारिणोमहेविष्णोदेवाएतेनतदिजाद्दानेनतद्विज्ञानपिसयाचितःसन् स्वीयमायुःदेवे

ममपदासंमितानीतित्रिविक्रमपदाभिप्रायेणानयानृतवादः तत्रापिस्वपदस्थानपरामात् १६ यावदर्थमेवप्रति
ग्राह्यमस्मः १७ ईश्वरस्ययाच्ञाकारणंयाच्ञाप्रकारेवाक्यावलेर्बन्धनप्रश्नोत्तरत्वेनतस्यापर्वातिरिकेणपृथिव्याप्र
कारमाह अहोइतित्रिभिः तेवाचोवृद्धानांसंमताः त्वंतुबालःबालिशमतिश्चेतिच्छेदः स्वार्थंप्रतिअबुधइतिव म
त्वानामेवार्थंबुध्यसेनस्वार्थंपरिग्रहणस्यतदव्यतिरेकेणस्वार्थाभावादित्यर्थः अबुधत्वमेवाह १८ मामितिद्वी

तस्मात्त्वत्तोमहीमीषद्वृणेहंवरदर्षभात् पदानित्रीणिदैत्येन्द्रसंमितानिपदामम १६ नान्यत्तेकाम
येराजन्वदान्याज्जगदीश्वरात् नैनःप्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहः १७ बलिरुवाच अहोब्राह्म
णदायादवाचस्तेवृद्धसंमताः त्वंबालोबालिशमतिःस्वार्थंप्रत्यबुधोयथा १८ मांवचोभिःसमारा
ध्यलोकानामेकमीश्वरं पदत्रयंवृणीतेयोबुद्धिमान्द्वीपदाशुषं १९ नपुमान्मामुपव्रज्यभूयोयाचि
तुमर्हति तस्माद्वृत्तिकरींभूमिंवटोकामंप्रतीच्छमे २० श्रीभगवानुवाच यावन्तोविषयाःप्रेष्ठाःत्रि
लोक्यामजितेन्द्रियं नशक्नुवन्तितेसर्वेप्रतिपूरयितुंनृप २१ त्रिभिःक्रमैरसंतुष्टोद्वीपेनापिनपूर्य
ते नववर्षसमेतेनसप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिपतयोनृपावैन्यगयादयः अर्थैःकामैर्गताना
न्तंतृष्णायाइतिनःश्रुतं २३ यदृच्छयोपपन्नेनसंतुष्टोवर्ततेसुखं नासंतुष्टःत्रिभिर्लोकैरजितात्मोप
सादितैः २४ पुंसोयंसंसृतेर्हेतुरसंतोषोर्थकामयोः यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः २५

पदस्यदाशुषंदातारं अबुद्धिमान्बस्ततस्त्वबुद्धिमानितिपदच्छेदः १९ कामंयथेच्छंसम्यक्यादप्रसंगेणेत्यर्थः अतएव
तस्याकरिष्यति २० पुनरपितैःस्वस्वत्वमेवप्राविष्कुर्वन्नाह यावन्तइतिसप्तभिः २१ नववर्षसमेतेनद्वीपेनापि
सप्तानांद्वीपानांवराणामिच्छया २२ तृष्णायाअन्तंनगताःस्तत्पराभिभूता इति २३ असंतुष्टःप्राप्तैःत्रिभिर्लोकैरपिनसु
खंवर्तते २४ २५ ॥

श्री॰ भा॰ अ॰ टी॰ ३५

आशुशुक्षणिरग्निः २६ सिद्धोहं कृतार्थः एतावतैवास्य सर्वस्वापहारसिद्धेः इति गूढोऽभिप्रायः न देवाह वित्तं हि यावत्प्र
योजनमेव स्वत्वमधिकं स्वत्वे पापावहत्वादित्यर्थः २७ अनयः अन्यायः अन्यायमेवाह एष इति त्रिभिः अपदनयमेवाग्नी
हमनेनाधिकं न त्वाह ३२ त्रिभिरिति क्रमतामिति चेत्तत्राह सर्वस्वमिति ३३ तथापि प्रतिश्रुतं संपादनीयं एवेति चेत्तत्रा
ह क्रमत इति द्वाभ्यां एकेन पादन्यासेन द्वाभ्यां भूमिं क्रममाणस्येत्यर्थः द्वितीयेन दिवं खं च तार्तीयस्य तृतीयपदन्या

यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६ तस्मात्त्रीणि
पदान्येव वृणे त्वद्वरदर्षभात् एतावतैव सिद्धोहं वित्तं यावत्प्रयोजने २७ शुक उवाच इत्युक्तः स हसन्ना
ह वांछातः प्रतिगृह्यतां वामनाय महीं दातुं जग्राह जलभाजनं २८ विष्णवे क्ष्मां प्रदास्यंतमुशना अ
सुरेश्वरं जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः २९ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता न
साधु मन्ये दैत्यानां महानुपगतोनयः ३० शुक्र उवाच एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः कश्यपाद
दितेर्जातो देवानां कार्यसाधकः ३१ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं दास्यत्याच्छिद्य शक्रा
य मायामाणवको हरिः ३२ त्रिभिः क्रमैरिमाल्लोकान्विश्वकायः क्रमिष्यति सर्वस्वं विष्णवे दत्वा मूढ
वर्तिष्यसे कथं ३३ क्रमतो गां पदैकेन द्वितीयेन दिवं विभो खं च कायेन महता तार्तीयस्य कुतो गतिः
३४ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् प्रतिश्रुतस्य योनीशः प्रतिपादयितुं भवान् ३५ न त
द्दानं प्रशंसंति येन वृत्तिर्विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसेर्थाय
कामाय स्वजनाय च पंचधा विभजन्वित्तमिहामुत्र च मोदते ३७

सस्य ३४ तथापि सर्वस्वदानात्कीर्तिस्तावद्भविष्यतीति चेत्तत्राह न तद्दानमिति ३६ तपः वित्तैकसाध्यं कर्म
एवं न तर्हि प्रतिश्रुतानृतेनेति कथमत्र जेवा चेत्तत्राह ३७ ॥

॥

राम॰ ३२

सार्थैः बहिरप्यविसत्यानृतं व्यवस्थायां ब्रह्मवक्तृत्वाद्धि प्रथमं सो मिति सत्यं नरतिश्रनृतमित्यादिना सत्यानृतयो
र्लक्षणं पूर्वोक्तं सम्प्रति निंदार्थं सत्यं विहितं अनृतं च निषिद्धं अनेन रूपेण गुणापत्तश्चिन्मन्तरमित्यादिना सत्यदोषान
नृते वगुणाननुक्त्वा तस्मात्कालेपवद्यात कालेन दद्यात् तत्सत्यानृते मिथुनीकरोति स्वरूपसंहारेणाह निसर्ग
त्वादिषु अनृतमपि अनुज्ञातेन तेन मिमं श्रुत्यर्थं दर्शयन्नाह ओमित्यंगीकारेणायन्योक्तं तत्सत्येनेति यद्राहतं देवानृत
तत्सत्यमर्थ्युं यदनृतं विना न सिद्ध्यतीत्याशयेनाह २९ सत्यं पुण्यफलं विद्यात् जानीयात् आत्मघ्नत्वं यदेहरूपं कैसीष्ट
तस्य कृतः गीयते श्रुत्योच्यते त्यर्थः पाठांतरं तस्मात् गामेषयपि श्रुत्याचावः सत्यं पुण्यफलं केयुक्तेन थापि वा वोदेह
निर्वाहाधीनत्वादात्मघ्नत्वस्य विप्रसक्तानामारेणोक्तं भवतः पुण्यफलास्थानीयमत्यंततः किमतः आह इह देहे

तत्रापि ब्रह्म चैवं गीतं श्रूयते मेमहत्समतम सत्यमोमितियत्प्रोक्तं यत्रैव्याहृतानृतं हितं २८ सत्यं पुण्य
फलं विद्यात् आत्महत्त्वस्य जीवितः हृते जीवति तत्रस्याद् अनृतं मूलमात्मनः २९ तद्यथाप्युत्सर्गदोन्मूलः
शुष्यत्सद्धर्तेनचिरात् एवं नष्टानृतः सद्यः आत्मा शुष्येन्न संशयः ३०

जीवति तत्पुण्यफलं न स्यात् मा नस्यादिति पाठे श्रुत्युक्तायावावः परामर्शः देहरक्षानृतेन रक्षणीयइत्याह अ
नृतं तस्यात्मनो देहस्य मूलं २९ एतदेव दृष्टान्तेन स्पष्टयति तद्यथाप्युत्सर्गोन्मूलः शुष्यति चिराद्देवोद्धर्तेन
एतत्रिवर्गपवित्रनष्टमनृतं यस्य स आत्मा देहः नश्यत शुष्येत् यद्यपि च श्रुत्याप्येवमेवानृतं वदन्नात्मानमाविर्मूलं
करोतीत्येवं निंदयानृतं निषिद्धं तथाप्युपसंहारात्मसारेणोक्तं केवलानृतविषयमित्यभिप्रेत्य व्याख्यातं द्रष्टव्यं तेन
निवर्तयैवोक्तः तथा वक्ष्यति ओमिति सत्यं नेत्यनृतं तत्र देवतः पुण्यं फलं वा वायोयत्सत्यमहे स्वरोयश स्वीकल्याणकी
र्तिर्भविता पुण्यादिफलं वा वः सत्यं वदन्स्थैतन्मूलं वा वीयदनृतं तद्यथाप्युत्सर्गाविर्मूलः शुष्यति संततं एवमेवा
नृतं वदन्नात्मानमाविर्मूलं करोति सशुष्यति स उद्धर्तेन तस्मादनृतं न वदेद्धयेन तद्वैनेतेन अनेन नत्र अनृतेन दयेन संक
टेष्वात्मानं रक्षेदिति श्रुत्यर्थः ३०

श्रीः
भा॰ अ॰
टी॰
८॰

सर्वथासत्यवचनेदेहोननिर्वहेदितिस्फुटीकर्तुंसत्यस्यदोषाननृतस्यगुणानाह परागितिद्वाभ्यां परोमित्य
क्षरंतत्पराक् हेयस्यार्थंगृह्णीयादावमीतिपराकरिक्तमितिकृतिपदस्यव्याख्यानमपूर्णंवेदति ४१ ननुतस्मादर्थिने
यत्किंचिदोमितिदास्यामीतिब्रूयात्तेनरिच्येतन्यूनोभवेत् किंचभिक्षवेसर्वमोंकुर्वन्नदास्यामीत्यंगीकुर्वन्नात्म
नेकामेननालंपर्याप्तोनभवतितस्यभोगोनसिद्ध्यतीत्यर्थः तथाचश्रुतिः परावापतद्रिक्तमक्षरंयदेतदो
मितितद्यत्किंचोमित्याहात्रैवास्मैतद्रिच्यते सयत्सर्वमोंकुर्यात्रिच्यादात्मानंकामेभ्योनालंस्यादितिनेतियदनृतं
तद्वचनंतत्पूर्णंपूर्णत्वसंपादकमभ्यात्मंचेतिचकारान्वयः आत्मनोभिमुखत्वमन्यस्यार्थमाकर्षतीति अभ्यात्मं
योह्नितिस्मममकिंचिदपिनास्तीतिसीदामीतिब्रूतेसद्धितेनानृतेनपरेषामर्थानाकर्षतीतिप्रसिद्धं ४२ ननुता

पराग्रिक्तमपूर्णंवाअक्षरंयत्तदोमिति तद्यत्किंचोमितिब्रूयात्तेनरिच्येतवैपुमान् ४१ भिक्षवेसर्व
मोंकुर्वन्नालंकामेनचात्मने अथैतत्पूर्णमभ्यात्मंयच्चनेत्यनृतंवचः ४२ सर्वंनेत्यनृतंब्रूयात्सदुष्की
र्तिःश्वसन्मृतः स्त्रीषुनर्मविवाहेचवृत्त्यर्थेप्राणसंकटे ४३ गोब्राह्मणार्थेहिंसायांनानृतंस्या
ज्जुगुप्सितं ४४ ॥ इतिश्रीभागवतेअष्टमस्कंधेएकोनविंशोध्यायः १९

र्हि इदमनृतवत्सर्वदामेवंस्यादित्याह सर्वमिति तथाचश्रुतिः अथैतत्पूर्णमभ्यात्मंयन्नेतिसयत्सर्वंनेतिब्रू
यात्पापिकास्यकीर्तिर्जायेतसैनंतत्रैवहन्यादिति अथोवृत्तिसंकटादिष्वनृतेनदोषइत्युपसंहरति स्त्रीषु
प्रोत्साहनेनवशीकारेनर्मणिपरिहासेविवाहेचवरादिस्तुतौ ४३ गवांब्राह्मणानांचहितार्थंहिंसायांचक
स्यचित्प्राणमाया तथाचयाज्ञवल्क्यः वर्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदेदिति तथाचश्रुतिः तस्मात्का
लएववदेत्कालेनवदेत्तत्सत्यानृतेमिथुनीकरोतीति ४४ इतिश्रीभावार्थदीपिकायामष्टमस्कंधेए
कोनविंशोध्यायः १९ विंशेनृतभीतोसात्त्वावापिकपटेहरेः ददावेवततोविष्णुःसहसावर्धताद्भुतम्
॥ राम

भगवतात्वयाप्रोक्तंसत्यंकिंतत् योर्थकामादिकंनबाधेतसगृहमेधिनांधर्मइति २ कथंप्रत्याचक्षेनिराकरो
मि ३ नन्वप्रत्याख्यानेदोषाउक्ताः तत्राहनाहमिति अथत्वाद्दारिद्र्याच्छ्रुतोरपि ५ किंचयद्यद्धनादिकंतत् स
र्वेसंपरेतंमृतंपुरुषंहास्यतित्यक्ष्यत्येवततःकिंमितिजीवतैवस्वयंनदीयमितिभावः तथापितावद्बहुलिसंकटपरिहारा
र्थंमयंवीदीयतांइतिचेत्तत्राह नसइति विप्रश्चेत्तेनार्थेनतुष्टेनापितत्स्येनतर्हितस्यार्थस्यत्यागेदानेकिंनिमित्तं

श्रीशुकउवाच बलिरेवंगृहपतिःकुलाचार्येणभाषितः तूष्णींभूत्वाक्षणंराजन्नुवाचावहितोगुरुं १
बलिरुवाच सत्यंभगवताप्रोक्तंधर्मोयंगृहमेधिनां अर्थंकामंयशोवृत्तिंयोनबाधेतकर्हिचित् २
सचाहंवित्तलोभेनप्रत्याचक्षेकथंद्विजं प्रतिश्रुत्यददामीतिप्राह्लादिःकितवोयथा ३ नह्यसत्या
त्परोधर्मइतिहोवाचभूरियं सर्वंसोढुमलंमन्येऋतेलीकपरंनरं ४ नाहंबिभेमिनिरयान्नाधन्या
दसुखार्णवात् नस्थानच्यवनान्मृत्योर्यथाविप्रप्रलंभनात् ५ यद्यद्धास्यतिलोकेस्मिन्संपरेतंध
नादिकं तस्यत्यागेनिमित्तंकिंविप्रस्तुष्येन्नतेनचेत् ६ श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः
दध्यंचिशिबिप्रभृतयःकोविकल्पोधरादिषु ७ यैरियंबुभुजेब्रह्मन्दैत्येंद्रैरनिवर्तिभिः तेषांकालो
ग्रसील्लोकानयशोधिगतंभुवि ८

ननुकिंतत् यावितताद्दल्पस्यदानेविप्रस्यासंतोषेणादानेवाधर्ममेवस्यादतः तथापिवित्तंसर्वंदेयंनवाविद्धिदेयमिति
भावः नर्हिनदेयमितिचेत्तत्राह श्रेयइति ६ दुस्त्यजैरसुभिरपिकोविकल्पोविचारः ७ दैत्येंद्रैर्युद्धेनिवर्ति
भिरियंभूर्बुभुजेउपभुक्तातेषामिहलोकात्परलोकाच्चभोगान्निवाकालोग्रसीत्संहृतवान् तत्तत्तेषुविद्याधि
गतंयशोमयंप्राग्रसीत् अतःकीर्तिरेवसाध्यानान्यदितिभावः ८ ॥ ॥

श्री॰
भा॰ अ॰
टी॰
४१

देहत्यागादपि धनत्यागो वीरकीर्तिर्भवतीत्याह सुलभा इति तनुत्यजेनीतिमिवत्यागमीर्थोपारेअपतीति दुर्लभाएधना त्यागएवमयाकार्यइतिभावः स तर्हि निर्धनत्वेन नरेदेतस्यादितिचेन्नाहमनस्विनइति यादृशात्तादृशानाम् अप्यर्थिनांकामोपनयेन कामप्रपूरणेन दुर्गतिदैन्यमपितयज्ञक्षोभनंभद्रमेव भवादृशानां तु कामोपनयेनेना दुर्गतिशोभनमितिकिंपुनर्वक्तव्यमित्यर्थः १० नायंवटुः किं तु विष्णुरिति चेत्तत्राह नर्हि स्वसनामेवदास्यामीत्या

सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः स मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वाञ्छितम् १० यजन्ति यज्ञं क्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ११ यद्यप्यसावधर्मेण मां बध्नीयादनागसं तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुं १२ एष वा उत्तमश्लोको न जिहासति यद्यशः हत्वा मैनां हरेद्युद्धे शयीतानिहतो मया १३ शुक उवाच एवमश्रद्धितं शिष्यमनादेशकरं गुरुः शशाप दैवप्रहितः सत्यसंधं मनस्विनं १४ दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः १५ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् वामनाय ददावेनामर्चित्वोदकपूर्वकं १६ विन्ध्यावलिस्तदागत्य पत्नी जालकमालिनी आनिन्ये कलशं हैममवनेजन्यपां भृतं १७ ॥

ह्र यजंतीति परः शत्रुर्वा त्वं ११ यद्यपि यशो न जिहासति तर्हि युद्धे मां हत्वा एनां भूमिं हरेत् शयीत न्नवास्माकं ह्रातः संप्रमविन्ने शयीतेति वा तस्यार्थः १३ अश्रद्धितमश्रद्धानं तस्य युद्धे १४ जालकस्रक्-आभरण विशेषः तन्मालावती अवनेजनी अपां पात्रं तेन पूर्णं १७

राम॰
४१

अवर्धत वाक्यात् प्रतिगृह्य नामितं बलिना पूर्वं ग्रहणत्वात् गुणत्रयमात्मनियस्य तत् अनयवंशः स्वमायायो
यस्मिन् आसन् स्थिताः जनाः २१ ऋत्विगादिसहितो बलिः तस्य हरेः काये एतद्विश्वं ददर्श २२ तदेव प्रपंच
यति रसामिति पादौ तैः सप्तभिः मारुतं गणं वायुसंघं इंद्रस्य सेना इव सेना यस्य सः इंद्रपदे स्थितत्वात् २३

यजमानस्तदा तस्य श्रीमत्पादयुगं मुदा अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनी १८ तदासु
रेंद्रं दिवि देवगणा गंधर्वविद्याधरसिद्धचारणाः तत्कर्म सर्वेपि गृणंत आर्जवं प्रसूनवर्षैर्ववृ
षुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिंनरा जगुः मनस्विनाने
न कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयं २० तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्म
कं भूः खं दिशो द्यौर्विवराः पयोधयः तिर्यङ्नृदेवा ऋषयो यदासन् २१ काये बलिस्तस्य महावि
भूतेः सहर्त्विगाचार्यसदस्य एतत् ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तं २२
रसामचष्टांघ्रितलेथ पादयोर्महीं महीध्रान्पुरुषस्य जंघयोः पतत्त्रिणो जानुनि विश्वमूर्तेरूर्वो
र्गणं मारुतमिंद्रसेनः २३ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीन् जघने आत्ममुख्यान्
श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् २५ इंद्रप्रधानानमरान्भुजेषु तत्कर्ण
योः ककुभो द्यौश्च मूर्ध्नि केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निं २६ ॥

एतत् आत्मा स्वयं बलिर्ऋत्विजो येषां तान् ऋक्षमालां नक्षत्रपंक्तिं २४ अंग हे राजन् समस्तरेफान् सशाखा
न् २५ द्यौश्च द्याव २६ ॥ ॥

श्री॰
भा॰ स्कं॰
टी॰
४२

रसेरसने २७ रेतसारेतसिक्रमणेषुपादन्यासेषुरोषधिजातयश्च २८ प्राणेष्विंद्रियेषुसर्वात्मनीत्यादिवाक्यं
नेरे २९ सहदर्शनादीनामीशंउपतस्थुरित्यन्तरेणान्वयः ३० विद्याधरोसिः ३१ स्फुरंतिकिरीटादीनियस्यसः
मधुव्रतानांस्रजोयस्यांतयावनमालयाश्रीवत्सादिभिश्चावृतोव्याप्तः ३२ उरुक्रमत्वमेवाह क्षितिमितिद्वितीयं
पदंक्रमतोविक्षिपतः त्रिविष्टपंकिंचिन्मात्रेउदीयेज्ञानेनतृतीयायपदनकिंचिदपिनचेष्टितः ३३ उरुक्रमस्यांघ्रिस्त्रि

वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषेधंचविधिंचपक्ष्मसु अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेधरा
एवलोभं २७ स्पर्शेचकामंनृपरेतसांभः पृष्ठेत्वधर्मंक्रमणेषुयज्ञं छायासुमृत्युंहसितेचमायांत
नूरुहेष्वोषधिजातयश्च २८ नदीश्चनाडीषुशिलानखेषुबुद्धावजंदेवगणानृषींश्च प्राणेषु
गात्रेस्थिरजंगमानिसर्वात्मनीदंभुवनंनिरीक्ष्य २९ सर्वेसुराःकश्मलमापुरंगसुदर्शनंचक्रमसह्य
तेजः धनुश्चशार्ङ्गंस्तनयित्नुघोषंपर्जन्यघोषोजलजःपांचजन्यः ३० कौमोदकीविष्णुगदा
तरस्विनीविद्याधरोसिःशतचंद्रयुक्तः तूणोत्तमावक्षयसायकौचसुनंदमुख्याउपतस्थुरीशं ३१ ।
स्फुरत्किरीटांगदमीनकुंडलःश्रीवत्सरत्नोत्तममेखलांबरैः मधुव्रतस्रग्वनमालयावृतोरराजराज
न्भगवानुरुक्रमः ३२ क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिशश्चबाहुभिः पदंद्वितीयं
क्रमतःत्रिविष्टपंनवैतृतीयायतदीयमण्वपि ३३ उरुक्रमस्यांघ्रिरुपर्युपर्यथोमहर्जनाभ्यांत
पसःपरंगतः ३४ इतिश्रीभागवतेअष्टमस्कंधेविश्वरूपोनामविंशोध्यायः २० ॥ ॥

विष्टपादुपर्युपरिगच्छन् महर्जनाभ्यांतपसश्चपरंसत्यलोकंगतइति ३४ इतिश्रीभावार्थदीपिकायां
अष्टमस्कंधेविंशोध्यायः २० एकविंशेपदाकृष्टनिमित्तेनबलिबंधने विमोनाहतनमस्कर्षेनस्याद्योप
यितेजने ॥ ॥

राम॰
४२

उरुक्रमस्यांघ्रिस्तपसः परंगतइत्यर्थः ततः किंहेतेनदाह सत्यंसत्यलोकं प्राप्तेनमघ्रिं समीक्ष्याब्जभवोब्र
ह्माभ्यगात् मरीचिमिश्रादयस्त्रितिद्वयोरन्वयः कथंभूतोब्जभवः हृतोरंघ्रेर्नखोपवेंदवः नैर्हृतानास्वधाम्नोद्यु
तिर्यस्यसः स्वयंवृतेनावृतः हृद्व्रताः हे नरदेव बृहद्व्रतायोगिनश्च १ अंगानिशिक्षाव्याकरणादीनि पुराणानितत्त्वेहि
नाम्नयोगसमीरोयोगवायुस्तेनदीपितेज्ञानमेवाग्निस्तेनरंधितेदग्धंकल्मषंकर्मफलंयेषांते २ सर्वेनमंघ्रिंववं

शुक उवाच सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोभ्यगात् मरीचिमिश्रा ऋ
षयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः १ वेदोपवेदा निगमान्विता यमास्तर्केतिहासांग
पुराणसंहिताः ये चापरे योगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषाः २ ववंदिरे यत्स्मर
णानुभावतः स्वायंभुवं धाम गता ह्यकर्मकं अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोर्हणो
दकम् ३ समर्च्य भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं धातुः कमंडलुजलं
तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं
भगवतो विशदेव कीर्तिः ५ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः सानुगा बलिमा
जह्रुः संक्षिप्तात्मविभूतये ६ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः धूपैर्दीपैः सुरभि
भिर्लाजाक्षतफलांकुरैः ७ ॥

दिरे यस्य श्रीवामनविष्णोः स्मरणानुभावतः ध्यानात्स्मरणात्प्रसादतः अकर्मकं वै कर्मभिरप्राप्यं विष्णोरंघ्र
ये ३ स्वायंभुवस्य नाभिपंकेरुहसंभवः तस्य श्रीविष्णोरंघ्रिसमभूत् सा लोकत्रयं निमार्ष्टि पवित्रयति ५ सं
क्षिप्तात्मा उपसंहृता आत्मनि विभूतिः स्वविस्तारो येन तस्मै यथा पूर्वं वामनरूपेणास्थिताय इत्यर्थः ७ ॥ ॥

श्री:
भा॰स्क॰
८२
टी॰

त्रिपदविषयव्याजयाच्ञाकपटयाच्ञानयासभर्तुर्बलिरिदानवस्यमहीं हृतां दृष्ट्वा ऊचुः ९ किमूचुः तदाह नवा इति

स्तवनैर्जयशब्दैश्च शंखदुंदुभिनिःस्वनैः ७ जांबवानृक्षराजस्तु भेरीशब्दैर्मनोजवः विजयंदिक्षु
सर्वासु महोत्सवमघोषयत् ८ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया ऊचुः स्वभर्तुरसुरादीक्षि
तस्यात्यमर्षिताः ९ नवायंब्रह्मबन्धुर्विष्णुर्मायाविनांवरः द्विजरूपप्रतिच्छन्नोदेवकार्यंचिकी
र्षति १० अनेनयाचमानेनशत्रुणावटुरूपिणा सर्वस्वंनोहृतंभर्तुर्न्यस्तदंडस्यबर्हिषि ११ सत्य
व्रतस्य सततंदीक्षितस्यविशेषतः नानृतंभाषितुंशक्यंब्रह्मण्यस्यदयावतः १२ तस्मादस्यवधो
धर्मोभर्तुःशुश्रूषणंचनः इत्यायुधानिजगृहुर्बलेरनुचरासुराः १३ तेसर्वेवामनंहंतुंशूलपट्टि
शपाणयः अनिच्छतोबलेराजन्प्राद्रवन्जातमन्यवः १४ तानभिद्रवतोदृष्ट्वादितिजानीकपान्नृ
प प्रहस्यानुचराविष्णोःप्रत्यषेधन्नुदायुधाः १५ नंदःसुनंदोथजयोविजयःप्रबलोबलः कुमु
दःकुमुदाक्षश्चविष्वक्सेनःपतत्रिराट् १६ जयंतःश्रुतदेवश्चपुष्पदंतोथसात्वतः सर्वेनागायु
तप्राणाश्चमूंतेजघ्नुरासुरीम् १७ हन्यमानान्स्वकान्दृष्ट्वापुरुषानुचरैर्बलिः वारयामाससंरब्धा
न्काव्यशापमनुस्मरन् १८ हेविप्रचित्तेहेराहोहेनेमेश्रूयतांवचः मायुध्यतनिवर्तध्वंननःकालो
यमर्थकृत् १९ यःप्रभुःसर्वभूतानांसुखदुःखोपपत्तये तंनातिवर्तितुंदैत्याःपौरुषैरीश्वरःपुमा
न् २० योनोभवायप्रागासीदभवायदिवौकसां सएवभगवानद्यवर्ततेतद्विपर्ययं २१ बलेनस
चिवैर्बुद्ध्यादुर्गैर्मंत्रौषधादिभिः सामादिभिरुपा
यैश्चकालंनात्येतिवैजनः
॥ २२ ॥

तिर्यंचदमाभिः १० अनेनयाचमानेनशत्रुणा ११ अर्थकृदनुकूलः १९ पौरुषैःतेकालमतिवर्तितुंप्रभावानीश्वरःसमर्थ

५४
प॰

हरेरनुचरा देवा दैवेन ऋद्धैः समृद्धैर्भवद्भिः २३ अर्थत्वायानुकूल्याय २४ विप्र पदत्रिकं याचे इति विराट्प्रभोर्वामन
स्य चिकीर्षितं ज्ञात्वा प्रथमार्थः अस्य सर्वस्वापहारेण ममेत्यभिमानं संत्यज्य इदानीं दत्तस्वीकारेणानुग्रहं कारमपि त्याजयि
त्वा परमानुग्रहं करिष्यतीति ज्ञात्वा तेन तत्त्वोन्यः कोपि समर्थो नास्तीति तद्यशः प्रख्यापनार्थं किंचिद्धरात्ययितुमपी
च्छतीति मनोभिप्रायं ज्ञात्वा ततो बबंधेति सौत्येहनि सोमाभिषवदिने २६ रोदस्योर्द्यावापृथिव्योः २७ असौ सूर्यो मया

भवद्भिर्निर्जिता ह्येते बहुशोनुचरा हरेः दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः २३ एतान्वयं विजेष्या
मो यदि दैवं प्रसीदति तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते २४ श्रीशुक उवाच पत्युर्निगदितं श्रु
त्वा दैत्यदानवयूथपाः रसां निर्विविशू राजन्विष्णुपार्षदताडिताः २५ अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्र
भुचिकीर्षितं बबन्ध वारुणैः पाशैर्बलिं सौत्येहनि क्रतौ २६ हाहाकारो महानासीद्रोदस्योः सर्वतो
दिशं निगृह्यमाणेसुरपतौ विष्णुना प्रभविष्णुना २७ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः नष्ट
श्रियं स्थिरप्रज्ञमुदारयशसं नृप २८ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर द्वाभ्यां क्रांता मही सा
तृतीयमुपकल्पय २९ यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः यावद्वर्षति पर्जन्यस्तावती भूरि
यं तव ३० पदैकेन मयाक्रांतो भूर्लोकः खं दिशस्तनोः स्वर्लोकस्ते द्वितीयेन पश्यतस्ते स्वमात्मना ३१
प्रतिश्रुतमदातुस्ते निरये वास इष्यते विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ३२ वृथा मनोर
थस्तस्य दूरे स्वर्गः पतत्यधः प्रतिश्रुतस्यादानेन योर्थिनं विप्रलंभते ३३

तनो तव वपुषा व्याप्तेनेत्यर्थः त्वं च दिशस्तनोः ततत्वाः ते स्वं मदीयं सर्वं श्लोकटीकापि इहैव ३१ गुरुणा शुक्रेण
अनुमोदितः सन् ३२ एवमुक्तोपि निरयपरिहारार्थं स्वर्गादिकं प्रविहाय अद्यैव मनोरथं ज्ञात्वं तं प्रत्याह इत्येति यः प्रति
श्रुतस्यादानेनार्थिनं विप्रलंभते तस्य मनोरथो वृथा एवं स्वर्गश्च दूरतस्ततः पतत्येव स बाधः पतनमेव तद्याचाहं विप्रलब्धः
तस्मात्त्वलोकफलमन्यत्र स्वफलं निरयं भुंक्ष्वेत्यर्थः ३३

श्री॰
भा॰ अ॰
टी॰
४४

इतिश्रीभावार्थदीपिकायामष्टमस्कंधे एकविंशोऽध्यायः २१ द्वाविंशेतुप्रसन्नः सन् तुष्टावाप्य सत्यं बलिं दर्शयन् हरिः तं मत्वा न हृष्टोऽभवत् विप्रकृतः अपकृतः भिद्यमानः सत्याच्चाल्यमानः हे उत्तमश्लोक ते निकटात् मम वचः ईरितं प्रतिश्रुतं ननु नाभवत् व्यलीकं त्वया कृतं त्रेता वामन त्वेन भवितास्यात्तु पौनरुक्त्यादि विप्रलम्भनं भवान् एवमपि यद्यहिमवाक्यं व्यलीकं मन्यते तन्नापि ऋतं मेवाहं करोमि इममहं तत्प्रलम्भनं न भवेन् मे शीर्ष्णि निजपदं तृतीयं कुरु न वक्ष्यमाणं विश्रुतकाम नो विक्रान्तवतो मे न वशिरः पदं पर्यन्तं न भवतीति मन्तव्याः विज्ञेन चेत् पदद्वयं ज्ञानेन मह्यैश्वर्यमधिकमेवस्यात् विज्ञादपि विज्ञ नाधिकत्वादिति भावः नत्वेव प्राप दंड्यं पुनरस्तोदारान् रक्षोहीनैरपि ग्रात्मानेसर्वज्ञोरद्वेषद्वारेरपि य

इतिश्रीभागवतेऽष्टमस्कंधे बलिविग्रहो नामैकविंशोऽध्यायः २१ शुक उवाच एवं विप्रकृतो राजन् बलिर्भगवतासुरः भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः १ बलिरुवाच यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते करोम्यृतं तन्न भवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजं २ बिभेमि नाहं निरयात्पदच्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात् नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ३ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं यन्न माता पिता भ्राता सुहृदश्चादिशन्ति हि ४ त्वं नूनमसुराणां नः परोक्षः परमो गुरुः यो नोऽनेकमदान्धानां विभ्रंशं ८

गुरुः

ननु पूर्वं मिथ्यावचनादात्मभयात्परिहारार्थं सर्वस्वं त्यक्तुमेतत्कृतो भीतः सन्नात्मानमर्पयसि तत्राह बिभेमीति ३ असाधुवादादपकीर्तेर्यथा हे भृशमुद्विजे तथा निरयादिभ्यो न बिभेमि ३ ननु मया निग्रहादपकीर्तिस्तव जातैव तत्रैवेत्याह पुंसामिति अर्हत्तमेनार्पितं यं दंडं माता दयापि नादिशन्ति हि नैवार्पयन्ति हि नेष्टं त्वया विगृहीतो हे स्वामिन् एवास्मीति भावः ४ ननु कं देवानां हितैषी नासुराणां तत्राह त्वं नूनमिति परोक्षः प्रच्छन्नेन वर्तमानः शत्रुत्वेन गर्भक्ता निवासमान त्वया हीनमेवेत्याह यस्मिन्निति ५॥ ॥ ॥

राम॰
४८

उग्रहोऽहमपि सिद्धं ६ अतो मम नाथ लज्जा नापि दुःखमिमं मह तेन गुरुणा भवता किं वयोयं देउ श्रेयो मम अनुग्रहः व।
याकृतः सततं वृद्धकपोत्रवेन ७ नवहमग्रहस्य पात्रमित्याशयेनाह पितामह इति भवदीयानां समतः यतश्चावि
ष्कृतः साधुवादो यस्य तन्मेवचरमग्रासयो यस्य सः अतो भवतो विपदोणाविहिंसा हिरण्यकशिपुनाविचित्रवैशसं
हिंसां संप्रापितोऽपि ८ देहादीनाममात्वं तानि श्चित्य अकुतोभयं ध्रुवं चभवतः पादपद्ममेव प्रपेदे अथतस्मादह

यस्मिन्नेवानुबन्धेन तृष्णाविबुधेनराः वसूलं लेभिरे सिद्धिं यामुहुर्मैकांत योगिनः ६ तेनाहेति
गृहीतोऽस्मि भवता भूरिकर्मणा वर्द्धस्तु वाक्याणः याथोर्गान्तु क्रीडनवच्च व्यथे ७ पितामहो मे भवदी
यसंमतः प्रह्लादश्चाविष्कृतसाधुवादः भवद्विपदोणाविचित्रवैशसं संप्रापितः वत्सप्रमः सुप्रिया
८ किमात्मनानेन महाविनिर्यतः किं विरूपहारैः स्वजनाख्यदस्युभिः किं जायया संसृतिहेतुभ
तया मर्त्यस्य गेहैः किमिहायुषो व्ययः ९ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पाद
पद्मं ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः १० अथाहमप्यात्मरिपोस्तवाति
कं दैवेन नीतः प्रसभं त्याजितश्रीः इदं कृतांतान्तिक वर्ति जीवितं ययाध्रुवं स्तब्धमतिर्नबुध्यते

॥ ॥ ॥

मपि दैवेन तस्यैव भाम्येन तवान्तिकं नीत इति वृत्तं गामन्वयः अंततः प्रायुषोंते विक्षुद्धारैः पुत्रे विहंगोहेतुकेवा
लमायुषो व्ययएवनतत्वंतव किंचित् ९ संप्रसिद्धो महान्स्वपक्षदेश कुलं तपयनीति तथा १० तस्यापि प्रस
भं बलात्त्याजिता श्री र्यस्य ययास्त्वशियास्तब्धमतिः सनुप्रमानिदं जीवितं ध्रुवेन बुध्यते कथं भूतं कृतवस्यांति।
कवर्ति मृत्योः संनिहितम् ११ ॥ ॥
ॐ नमो नमः

राकापतिः शशीन्दुः १२ अंजनत्विषं श्यामं १३ समर्हणंकामादिरपापराधस्मरणेन सव्रीडं नीचीनमधो
मुखं यस्य सः शिरसानमन्नुत्यत्रमूर्ध्नाननाम १४ बलेस्तत्कृतमनुगृहं दृष्ट्वा पुलकैरस्त्राभिश्च विक्लवो विह्व
लः १५ त्वयैवेति नहेतुंदं पदमेवदत्तं यत्तयापहृतं किं तस्य मेव शुनः स्वीकृतं तत्तथैव शोभनमेव कृतं न तत्र हेतुः

शुकउवाच तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः
१२ तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणं प्रांशुं पिशंगाम्बरमंजनत्वि
षं प्रलम्बबाहुं सुभगर्षभमैक्षत १३ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्वव
न्ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह १४ स तत्र हासीनमुदीक्ष्य सत्पतिं
सुनन्दनन्दाद्यनुगैरुपासितं उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः १५
प्रह्लादउवाच त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं मन्ये महानस्य कृतो ह्य
नुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् १६ यया हि विद्वानपि मुह्यते यतः तत्को विचष्टे गति
मात्मनो यथा तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे १७ शुकः ब
द्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला प्रांजलिः प्रणतोपेन्द्रं बभाषेवाङ्मुखी नृप १८

मन्मइति यद्यस्मात् श्रीविषयादात्ममोहनेन तस्माद्विभ्रंशितः १६ मोहनत्वमेवाह यया श्रिया विद्वानपि
यतः संयतोपि मुह्यते तेन तस्याममको न्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे प्रपश्यति तस्मै महाकारुणि
काय १७ ॥

तस्यप्रह्लादस्याप्युतनद्भावाचेतिकिंविदहन्तंप्रष्टुंतरत्यर्थः तदेवविन्ध्यावलिःबलिपत्न्यपिवक्तुंप्रवृत्तेत्यर्थः तांव
समानयन्हिरण्यगर्भःस्तुवन्तस्त्रीभूतः अतस्तस्याएववाक्यंप्रथममवतारयतिबह्वीत्येति त्रिजगतःकर्तुःप्र
भोपालकस्यास्यतुयत्सेहर्तेस्वंईश्वरस्यतवकिमस्येआवहन्तिकिंसंपादयंतित्वयावरोपितःकर्तृवादःकर्ताहः
स्वतंत्रावयमितिवादमात्रमपियेषांतेअयंभावःलोकत्रयमर्पितंतत्तृनीयपदायदेहंसमर्प्यप्रतिश्रुतेअर्हतेक
रोतिदेहादिषुस्वाम्याभिमानोक्ष्रुवन्नयंकुबुद्धिःनिर्लज्जश्चयतःतमेवसर्वस्यापिस्वामीत्येतामदबुद्धिःमेवं के

विन्ध्यावलिः क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतुतत्रकुधियोपरईशकुर्युः कर्तुःप्रभोस्त
वकिमस्यतआवहंतित्यक्तह्रियःत्वदवरोपितकर्तृवादाः १९ तस्यानुपश्यतोराजन्प्रह्लादस्यकृ
ताञ्जलेः हिरण्यगर्भोभगवानुवाचमधुसूदनं २० ब्रह्मोवाच भूतभावनभूतेशदेवदेवज
गन्मय मुञ्चैनंहृतसर्वस्वंनायमर्हतिनिग्रहं २१ कृत्स्नातेनेनदत्ताभूःलोकाःकर्मार्जिताश्चये
निवेदितंचसर्वस्वमात्माविक्लवयाधिया २२ यत्पादयोरशठधीःसलिलंप्रदायदूर्वाङ्कुरैरपिविधा
यसतींसपर्यां अप्युत्तमांगतिमसौभजतेत्रिलोकींदाश्वानविक्लवमनाःकथमार्तिमृच्छेत् २३
श्रीभगवानुवाच ब्रह्मन्यमनुगृह्णामितद्विशोविधुनोम्यहं यन्मदःपुरुषःस्तब्धोलोकंमांचा
वमन्यते २४ ॥

बलेःकृपयाविमुच्यपालयेतितदेवप्रह्लादस्यविन्ध्यावलेश्चपरमार्थोज्ञापसवोहरिःब्रह्मातल्लोकदृष्ट्यैवविज्ञा
ज्ञापयतिभूतभावनेतित्रिभिः २१ निग्रहानर्हत्वेहेतुःकृत्स्नेतिसर्वस्वमेवाहात्मेति २२ तदेवकैमुत्यन्यायेनाह
यस्यतवपादयोःसलिलमात्रमपिप्रदायसर्वोपिजनउत्तमांगतिंप्राप्नोतितत्सेतत्रभयमसौबलिःत्रिलोकींदाश्वा
न्दत्तवान् आर्तिंकथंप्राप्नुयात् २३ तद्विशइतिपाठःतस्यविषयार्थान्धनंतनुअर्थापहारःकोयमनुग्रहःतत्राहयन्
मदःयेनधनेनमत्तोयस्मात्सःअतएवस्तब्धःयतश्चःतन्मदस्तेनमत्तेहंतोश्रपहारएवानुग्रहइत्यर्थः २४ ॥

श्री:
भा॰प्र॰
टी॰
४९

दुर्लभं च कथं जन्म कथं चिल्लभ्यते जीवस्य जन्मादिनिमित्तो गर्वो महाहानिकरः तस्य च नाशो मदनुग्रहेणेत्याह य
देति द्वाभ्यां अनीशः परतंत्रः सन्निजैः कर्मभिर्नानायोनिषु कृमिकीटादिषु संसरन् तत्र पौरुषीं गतिं गतो जन्मादिभि
र्यस्य यदि स्तंभो न भवेत्तर्हि अयं मदनुग्रह एव २६ कथं तर्हि ध्रुवादिभ्यः संपदो दत्तासीति चेत्तत्राह मानस्तं
भः स्तब्धता तस्य निमित्तभूतानां समंततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां मध्येपि जन्मादिभिरिति वा हंतेति खेदे बा
लिर्मत्परो न मुह्येत् अतो भक्तेभ्यस्तेभ्यः संपदोपि ददामि अभक्तस्तु मुह्येदिति तदपहारः स्वरूपमेव तस्यानुग्रहं क

यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् २५ जन्मक
र्मवयोरूपविद्यैश्वर्यधनादिभिः यद्यस्य न भवेत्स्तंभः तत्रायं मदनुग्रहः २६ मानस्तंभनिमित्तानां
जन्मादीनां समंततः सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः २७ एष दानवदैत्यानामग्रणीः की
र्तिवर्धनः अजैषीदजयां मायां सीदन्नपि न मुह्यति २८ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्ध
श्च शत्रुभिः ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः २९ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सु
व्रतः छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ३० एष मे प्रापितः स्थानं दुष्प्रापममरैरपि सा
वर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ३१ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं यत्राधयो व्या
धयश्च क्लमस्तंद्रा पराभवः नोपसर्गा निवसतां संभवंति ममेक्षया ३३

रोमीति भावः २७ दैवीका २८ अस्य वेदानीमस्य त्वादन्यैर्दुष्प्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमाह ए
ष इति त्रिभिः नह्येतस्मिन्कुले कश्चिन्निःसत्वः कृपणः पुमान् इत्यादिना छलैरेव मया धर्म उक्तः तथापि न धर्मम॰
यं न त्यजति २९ सत्या वाक् यस्य ३० मे मयानुग्रहेणैव आश्रयः पालको यस्य सः ३१ स्थानं प्रापितमिति यदुक्तं तदेव
स्थानमाह तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां अधिवसत्वित्यर्थः ३२ यत्रास्मिन्निवसतां आध्यादयो
मम ईक्षया न संभवंति ३३

एवं बलिना प्रत्युक्ताकरणपापबन्धः सोपि नाशितः ततः सान्त्वयन् बलिं प्रत्याह इंद्रसेनेति त्रिभिः ३४ त्वच्छासनमतिगाढं तिरस्कृतिव
नैन्तरतिनधान्नात् ३५ तथापि भगवद्वियोगानन्दनिष्ठं ते प्रत्याह सदेति ३६ संगमाद्यस्माद्विरोभावः सद्विनंक्ष्यति ३७
इति श्रीभावार्थदीपिकायामष्टमस्कंधे द्वाविंशोध्यायः २२ त्रयोविंशे बलिर्याति सुतलं सपितामहः उपेंद्रेणादितिं गत्वा स्वर्गं
दत्तं हरिः बाष्पकलाभिर्विंदुभिराकुले ईक्षणे यस्य भक्त्या उत्कलउत्कंठः १ अहो त्वत्प्रणामस्यमहिमा यदर्थं

इंद्रसेन महाराज याहि भो भद्रमस्तु ते सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ३४ न त्वामभि
भविष्यंति लोकेशाः किमुतापरे त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ३५ रक्षिष्ये सर्वतोहं त्वां
सानुगं सपरिच्छदम् सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ३६ तत्र दानवदैत्यानां संगात्ते भाव आसु
रः दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनंक्ष्यति ३७ इति भागवते अष्टमस्कंधे द्वाविंशोध्यायः २२ शुकः
इत्युक्तवंतं पुरुषं पुरातनं महानुभावोखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो
गद्गदया गिराब्रवीत् १ बलिरुवाच अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहि
तः यल्लोकपालैस्त्वदनुग्रहोमरैरलब्धपूर्वोपसदेसुरेर्पितः २ शुक उवाच इत्युक्त्वा हरिमानम्य ब्रह्म
णं सभवं ततः विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ३

कृतः समुद्यम एव प्रपन्नानां भक्तानां योर्थः तस्य विधौ भक्तेप्सितसंपादने समाहितः अप्रमत्तः स्थितः कुतः य
द्यतो योमेन लोकपालैरमरैः सत्त्वप्रधानैरपि अलब्धपूर्वः त्वदनुग्रहः अपसदे नीचे राजसे मयि अर्पितः अयं भावः
परमेश्वराय प्रणामं कर्तुं ब्रह्मादीनां ब्रह्मादयः त्रिलोकीं दत्त्वा नितरां दास्यं प्रणामोन सम्यक् कृतः किंतु तदर्थं समुद्यममात्रं कृतं तेन त
त्पादानि कोटिभिरप्यलभ्यः त्वदनुग्रहः संपादितः अ
हो त्वत्प्रणामाश्चर्यमिति १ २ ॥ ३ ॥

श्री॰
भा॰ अ॰
टी॰
पं॰

अस्माकमुपेंद्रः सर्वपालयामास ४ दुर्गपालोसिरक्षितासिहेसर्वजनस्तुतत्वात् ६ हे शरणद ब्रह्मादयश्च कुसृतयोर
दुष्टेन्नाः खलयोनयः उग्रजातस्य तेतवयेन स्वभक्तोदाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः बहुमानेनविन्या
स्तवर्निनंदाक्षिण्यं तेनदृष्टिर्लक्षितविषयतां प्रापिताः ७ भक्तप्रियत्वाच्चेन्नहि पूर्वं तवेहितमहो विचित्रमहो किंतत्सर्वा
त्मनः समदृशश्चस्वभावोवि षमइतियत् सर्वात्मत्वेविषमत्वकारित्वे हेतुः अमितायाचिंत्यायोगमायानयालीलान

एवमिंद्राय भगवान्प्रत्यानीय त्रिविष्टपं पूरयित्वादितेः काममशासत्सकलंजगत् ४ लब्धप्रसादंनि
र्मुक्तंपौत्रंवंशधरंबलिं निशाम्य भक्तिप्रवणः प्रह्लादइदमब्रवीत् ५ नेमंविरिंचोलभतेप्रसादंनश्रीर्न
शर्वः किमुतापरेन्ये यन्नोसुराणामसिदुर्गपालो विश्वाभिवंद्यैरभिवंदितांघ्रिः ६ यत्पादपद्ममकरं
दनिषेवणेनब्रह्मादयः शरणदाश्नुवतेविभूतीः कस्माद्वयंकुसृतयः खलयोनयस्तेदाक्षिण्यदृष्टिप
दवींभवतः प्रणीताः ७ चित्रंतवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य सर्वा
त्मनः समदृशोविषमस्वभावोभक्तप्रियोयदसिकल्पतरुस्वभावः ८ श्रीभगवानुवाच वत्सप्रह्लाद
भद्रंतेप्रयाहिसुतलालयं मोदमानः स्वपौत्रेणज्ञातीनांसुखमावह ९ नित्यंद्रष्टासिमांतत्रगदापा
णिमवस्थितम् मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः १० ॥ ॥

याविसृष्टानिरचितानिभुवनानियेनतस्यअहोइत्याश्चर्यविस्मयेवार्थः समदृशोहेतुः विशारदस्यसर्वज्ञस्यअथवा
भक्तप्रियत्वेपिवैषम्यंनास्त्यवचनः कल्पतरुस्वभावः सन् भक्तप्रियोसिनहिकल्पतरुराश्रितानामेवका
मान्पूरयन्नपिविषमोभवतीत्यर्थः ८ मद्दर्शनेनयोमहाह्लादः तेनध्वस्तंकर्म
बंधनमज्ञानंयस्य १० ॥

पा॰
पं॰७

कर्म वितन्वतः शिष्यस्य यच्छिद्रं मंत्रतंत्रेन जातं तत्सर्वं त्वं विस्तारय सन्तनु स्वयजमानं विना कथं मन्त्रानुक्तमिति नवा
च्यमित्याह यत्तदिति ब्रह्मदृष्टं ब्राह्मणैर्दृष्टं एवं समं भवेत् किं तु न रन्तुष्ठितमित्यर्थः १४ भवान्यस्य सर्वेणापि भा
वेन वस्तुमात्रेण पूजितः तस्य कर्मसु कुतो वैषम्यं कथंभूतः कर्मणामीश्वरः प्रवर्तकः यज्ञफलदः यज्ञमयश्च पुरु

शुकउवाच आज्ञां भगवतो राजन्प्रह्लादो बलिना सह बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्ज
लिः ११ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं १२ अथा
होशनसं राजन्हरिर्नारायणोऽन्तिके आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां १३ ब्रह्मन्संतनु शिष्य
कर्मच्छिद्रं वितन्वतः यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् १४ शुकउवाच कुतस्तत्कर्मवैषम्यं य
स्य कर्मेश्वरो भवान् यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः १५ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तु
तः सर्वं करोति निश्छिद्रमनुसंकीर्तनं तव १६ तथापि वदतो भूमन्करिष्याम्यनुशासनं एतच्छ्रेयः
परं पुंसां यत्तवाज्ञानुपालनम् १७ शुकउवाच अभिनंद्य हरेराज्ञामुशना भगवानिति यज्ञच्छिद्रं स
माधत्त बलेर्विप्रर्षिभिः सह १८ एवं बलेर्महीं राजन्भिक्षित्वा वामनो हरिः ददौ भ्रात्रे महेन्द्राय त्रि
दिवं यत्परैर्हृतं १९ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः दक्षभृग्वंगिरोमुख्यैः कुमारेण भ
वेन च २० ॥

षः १५ मन्त्रतो नावसञ्जायमानं तंत्रतः स्वरादिभ्रंशेन तंत्रतः क्रमादिना देशतः कालतश्च अर्हतः पात्रतः
वस्तुतः दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तवानुकीर्तनमात्रमेव निश्छिद्रं करोतीति १६ हरेराज्ञां प्रतिनंद्य बले
र्यज्ञच्छिद्रं समाधत्त सन्धेयपाठांतरे समाधाय तामाज्ञां सम्पादितवानिति शेषः १८ तद्देवाश्च सर्वे च भूमि
पाश्च मनवश्चैतैः सहितैः २० ॥

श्री:
भा॰स्क॰
टी॰
९८

ननु लोकादीनां पतिरिन्द्रोऽस्त्येव सत्यं तथापि वेदादीनां कल्प्यं पालने दक्षं २२ वामनमुपेन्द्रं कल्पयांचक्रे २३ देवयानेन विमानेन मार्गेण २४ एतच्चरितं सर्वमाख्यातमिति विशेषोक्तानाश्रुत्वाप्यपि संतोषं तुष्टं तानि तर्हि निःशेषाणि वर्णनीयान्यपीत्यपेक्षायामाह पारमिति उरुव बहुधा विक्रमतो विष्णोर्महिम्नः पारं यो गृणानो भवति स

कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिम् २१ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः २२ उपेन्द्रं कल्पयांचक्रे पतिं सर्वविभूतये तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप २३ ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनं लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः २४ प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः श्रिया परमया जुष्टो मुमुदे गतसाध्वसः २५ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये २६ सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे २७ सर्वमेतन्मयाख्यातं भवतः कुलनंदन उरुक्रमस्य चरितं श्रोतॄणामघमोचनं २८ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य २९ य इदं देवदेवस्य हरेरद्भुतकर्मणः अवतारानुचरितं शृण्वन्याति परां गतिम् ३०

मर्त्यः पार्थिवानि रजांसि परमाणून् विममे गणितवान् यद्यपि पार्थिवपरमाणुगणनमशक्यं तथापि विष्णोर्गुणगणाः इति एवमाह कथं किं जायमानो जातो वा उपैति न कोपीति वदन्ननंतत्वं नैवाहेत्यर्थः ॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमाप इति २९ य इदमिति स्पष्टम् श्रृण्वन् परां गतिं याति ३० तथा च मंत्रः

सुकृतं यथावत्सुकृतं नो विदुः ३१ इति श्री भावार्थदीपिकायामष्टमस्कंधे त्रयोविंशोऽध्यायः २३ चतुर्विंशे ऽष्टमस्कंधे
नमत्स्यरूपस्य धारिणः लीलोद्धृतेन यन्ना शास्त्रं तत्त्वनरक्षामहार्णवे तत्त्वं तत्त्वनिर्दिष्ट प्रसादो निजे सर्वनिर्दिष्टेन
न मत्स्यरूपो निरधीशो लीलयावतार मत्स्येनोपमे मायया मत्स्यरूपानुकरणाय स्थानिरूपणेन १ ननु कस्मा
द्वस्मादेवं मत्स्यावतारश्रवणेच्छा श्रीवामनावतारश्रवणेच्छा यदर्थमिति तामसो दुर्मर्षं दुस्सहं वलेरंग्रहा
यत्तत्त्वगुप्तिनमपि याचक रूपं धृतवानिति गुरुत्वेन यदर्थं तल्लोक जुगुप्सितं मात्स्यं रूपमधारयत् एतन्नो यथाव

विधमानोऽकर्मतीर्हदेवे पित्र्ये यमानुषे यत्र यत्रानुकीर्त्यते तत्तत्तेषां सुकृतं विदुः ३१ इति श्री
भागवते अष्टमस्कंधे त्रयोविंशोऽध्यायः २३ राजोवाच भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः
अवतारकथामाद्यां मायामत्स्यविडंबनं १ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं तमःप्रकृति
दुर्मर्षं कर्मग्रस्त इवेश्वरः २ एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलो
कसुखावहं ३ सूत उवाच इत्युक्तो विष्णुरातेन भगवान्बादरायणिः उवाच चरितं विष्णोर्मत्स्य
रूपेण यत्कृतं ४ शुक उवाच गोविप्रसुरसाधूनां छंदसामपि चेश्वरः रक्षामिच्छंस्तनूर्धत्ते
धर्मस्यार्थस्य चैव हि ५ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः नोच्चावचत्वं भजते निर्गुणत्वाद्धियो
गुणैः ६ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७

वक्तुमर्हसीत्यर्थः ३ सामान्येनावतारप्रयोजनमाह गोविप्रेति जुगुप्सितं तत्त्वं परिहरति ५ धियो गुणैर्या
ऽसुच्चावचानि रूपाणि तेषु नियंतृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् अतः शुद्धसत्त्वमयैर्मत्स्यो
द्यवतारैरुच्चावचत्वशंकेति भावः ६ विशेषेण मत्स्यावतारप्रयोजनमाह आसीदिति त्रिभिः ब्रह्मणो निद्रया
ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः समुद्रे उपप्लुता निमग्नाः ७ ॥
॥

श्री:
भा॰पु॰
टी॰
९५

अंतिकेनिःसृतान् ८ शफरीरूपंमत्स्यरूपं ९ प्रयोजनांतरंलीलाप्रकारंवाह तत्रराजऋषिरित्यादियावत्समा
प्ति १० सत्यव्रतःश्राद्धदेवइतिख्यातः ११ कृतमालायांनद्यां १२ औदंचनोदकेमणिकस्थजले १९ रक्षायोगेनो

कालेनागतनिद्रस्यधातुःशिशयिषोर्बली मुखतोनिःसृतान्वेदान्हयग्रीवोंतिकेहरत् ८ ज्ञात्वा
तद्दानवेंद्रस्यहयग्रीवस्यचेष्टितं दधारशफरीरूपंभगवान्हरिरीश्वरः ९ तत्रराजऋषिःकश्चि
न्नाम्नासत्यव्रतोमहान् नारायणपरोतप्यत्तपःससलिलाशनः १० योसावस्मिन्महाकल्पेतन
यःसविवस्वतः श्राद्धदेवइतिख्यातोमनुत्वेहरिणार्पितः ११ एकदाकृतमालायांकुर्वतोजलत
र्पणं तस्यांजल्युदकेकाचिच्छफर्येकाभ्यपद्यत १२ सत्यव्रतोंजलिगतांसहतोयेनभारत उत्सस
र्जनदीतोयेशफरींद्रविडेश्वरः तमाहसातिकरुणंमहाकारुणिकंनृप यादोभ्योज्ञातिघातिभ्यो
दीनांमांदीनवत्सल १४ कथंविसृजसेराजन्भीतामस्मिन्सरिज्जले तमात्मनोनुग्रहार्थंप्रीत्या
मत्स्यवपुर्धरं १५ अजानन्रक्षणार्थायशफर्याःसमनोदधे तस्यादीनतरंवाक्यमाश्रुत्यस
महीपतिः १६ कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमं सातुतत्रैकरात्रेणवर्धमानाकमंडलौ
१७ अलब्ध्वात्मावकाशंवाइदमाहमहीपतिं नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे १८ कल्प
यौकःसुविपुलंयत्राहंनिवसेसुखं सएनांततआदायन्यधादौदंचनोदके १९ तत्रक्षिप्तामु
हूर्तेनहस्तत्रयमवर्धत नमएतदलंराजन्सुखंवस्तुमुदंचनः २० पृथुदेहिपदंमह्यंयत्त्वाहंशर
णंगता ततआदायसाराज्ञाक्षिप्ताराजन्सरोवरे २१ तदावृत्यात्मनासोयंमहामीनोन्ववर्धत
नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः २२ निधेहिरक्षायोगेनह्रदेमामविदासिनि इत्युक्तः
सोनयन्मत्स्यंतत्रतत्राविदासिनि २३

पायेनयथामहाह्रदस्थोमेरवोनजलेविनाशुष्यतेतेनोपायेननिधेहि अविदासिनिअनुपक्षये २३ ॥

९५

संमितंतज्जलाशयपरिमितंसरः २६ अभिव्यानशेअभितोव्याप्तवान् २७ मुख्यःसख्युःआत्माचगतिश्चआश्रयः
२८ हेअरविंदाक्षतवपदोपसर्पणंमृषाभवेत्पृथगात्मनांदेहाद्यभिमानिनांसतामितरेषांयथातथासर्वसुहृत्प्रिया
त्मनः तवपादोपसर्पणंमृषानभवेत् यद्यस्मात्त्वंभक्तानांअद्भुतंवपुरदीदृशः दर्शितवानसियाऽतस्तदेवमुख्य

जलाशयेऽसंमितेतंसमुद्रेप्राक्षिपज्झषं क्षिप्यमाणस्तमाहेदमिहमांमकरादयः २४ अदंत्यतिव
लावीरमांनेहोत्स्रष्टुमर्हसि एवंविमोहितस्तेनवदतावल्गुभारतीं २५ तमाहकोभवानस्मा
न्मत्स्यरूपेणमोहयन् नैवंवीर्योजलचरोदृष्टोस्माभिःश्रुतोपिवा २६ योभवान्योजनशतमह्ना
भिव्यानशेसरः नूनंत्वंभगवान्साक्षाद्धरिर्नारायणोव्ययः २७ अनुग्रहायभूतानांधत्सेरूपंज
लौकसां २७ नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वर २८ भक्तानांनःप्रपन्नानांमुख्योह्यात्मग
तिर्विभो २८ सर्वेलीलावतारास्तेभूतानांभूतिहेतवः ज्ञातुमिच्छाम्यदोरूपंयदर्थंभवताधृतं
२९ नतेरविंदाक्षपदोपसर्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषांपृथगात्मनांसता
मदीदृशोयद्वपुरद्भुतंहिनः ३० इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये विहर्तु
कामःप्रलयार्णवेब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रभुः ३१ श्रीभगवानुवाच सप्तमेद्यतनादूर्ध्वम
हन्येतदरिंदम निमंक्ष्यत्यप्ययांभोधौत्रैलोक्यंभूर्भुवादिकम् ३२

गात्मनोभेददर्शिनःपुंसः अत्यर्थःसतांपरिच्छिन्नानांपदोपसर्पणंयथामृषेत्यर्थः ३० एकांतजनाभक्ताःप्रिया
यस्य ३१ अप्ययांभोधौप्रलयार्णवे
भूर्भुवआदिकमित्यर्थः ३२॥

संवर्ताम्भसि प्लये॒दके वा॰ उपस्थास्यति प्राप्स्यसि ३३ ओषधीरादायेति शेषः ३४ ऋषीणामेवालोकेन र

त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ३३
त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ३४ आरुह्य
बृहतीं नावं विचरिष्यस्यविक्लवः एकार्णवे निरालोके ऋषीणामेव वर्चसा दोधूयमानां तां ना
वं समीरेण बलीयसा उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ३६ अहं त्वामृषिभिः साकं सह
नावमुदन्वति विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ३७ मदीयं महिमानं च परं ब्रह्मेति शब्
दितं वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ३८ इत्थमादिश्य राजानं हरिरन्तरधीयत सोन्ववैक्ष
त तं कालं यं हृषीकेश आदिशत् ३९ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः निषसाद
हरेः पादौ चिंतयन्मत्स्यरूपिणः ४० ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं ॥ वर्धमानो महा
मेघैर्वर्षद्भिः समदृश्यत ४१ ध्यायन्भगवदादेशं ददृशे नावमागतां तामारुरोह विप्रेन्द्रैरादा
यौषधिवीरुधः ४२ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं स वै नः संकटादस्मादविता शं वि
धास्यति ४३ सोनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे एकशृंगधरो मत्स्यो हैमो नियुतयोजनः
४४ निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ४५

विचरिष्यसि ३५ महाहिना वासुकिना ३६ मे मया अनुगृहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि ३८ वर
त्रेण डोरकेण ४५ ॥ ४५ राम

सागरं तत्प्रविष्टं तेन विष्णुना च सागरं मत्स्यरूपेणागुरुत्वेन तदाचष्टावहारि मत्स्यभिः अत्रेदं विचिन्त्यं किमयं महाप्रलयो दैनं
दिनो वेति न तावद्ब्राह्मो लयः तदा तियोः सावस्मिन्महाकल्पः इति चोक्तं मत्स्याप्रलयः इति आत्मनेतिक्रमः महाप्रल
यश्च पृथिव्यादीनामेव शेषासंभवात् यावद्ब्राह्मी निशा नादिवृत्तिविरोधात् अतो दैनंदिन इति युक्तं न चैवं तदपि
संगच्छते मां वर्तकैः नाशसाद्यादिभिर्विनाकस्मादेव समस्मेह निखिलोकं निमज्जती तिमत्स्योक्ते स्त्रनुपपन्ने यञ्चो
क्तं प्रथमस्कंधे रूपं स जगृहे मात्स्यं चाक्षुषान्तरसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति तदपि न
चाक्षुषे दैनंदिनप्रलयहेतये पिमहीमय्यां नाव्यारोहः संभवति न चाक्षुषमन्वन्तरे प्रलयो स्ति तथा वसतिसममोम
नुर्वैवस्वतत्वापि युद्धं टं स्यात् तेनावरोषधीः सर्वाः स्मादिनिर्देशोपि न संगच्छते न दिनदा गोषध्यादीनां सह्यात्वा

राजोवाच अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः यदृच्छयेहोपसृता यमा
प्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ४६

वावशेषः संभवति तस्मादन्यथा वर्णनीयतेन वायं वा स्त्रवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञानोपदेशाय प्राविर्भू
तो भगवान् वैत्यमाप्यस्य मत्स्य प्रलयं च वदर्शयामास यथा स्मिन्नेव वैवस्वतमन्वन्तरे मार्कण्डेयाय दर्शितवान्
तदपेक्षयैव च महाकल्पे स्मिन्निति विशेषणं संगच्छते तथा च ततः समुद्र उद्वेलः सर्वतः समदृश्यतेति त
स्य वचन स्वादर्शनस्यक्तमित्येषा दिक प्रस्तुतं तस्तो व्याख्यास्यामः तदनन्तरानायो निगुसंस्मृतः स्मस्य भगवन्तं
प्रत्येवं तं स्वामिं दृष्टा कृत्येन मेव प्रार्थयते अनादिर्या अविद्या तया उपहता प्रावृता आत्मसंविद्येषां ते अतएवावि
द्यामूलेः संसारपरिश्रमैरातुराः इह संसारे यदृच्छया यदनुग्रहादेवोपसृता प्राप्यितः संतो यं प्राप्नुयुः स भवा
नेव सतां तो गुरुः सन्तु ग्रन्थिं भिंद्यादित्युत्तरेणान्वयः ४६

श्री:
भा. अ.
टी.
५९

ननु वैराग्यं विना कुतो मुक्तिः तर्हि तस्य वस्तौ वैक फलत्वात्तस्यामादिशन्नाशयेनाह प्रबुधोयं जनः अमस्तं
यथा भवति न यथाकर्म संसमीहते तान्स्व विच्छिन्नो हृदयरूपं ग्रन्थिं स विघातयतः स एव परमो गुरुः ४७ ननु यस्त
दानादिभिः सत्त्वशुद्धिं विना कथं ग्रन्थिभेदः स्यात्तत्राह यस्य सेवयैव पुमानात्मनो मनसो मलेन मोविजह्या
त्यहीनमलः निजं वर्णं वस्त्ररूपं भजते तस्मै ईशो नः गुरुर्भूयात् यतः स एव गुरोरपि परमो गुरुः मलहाने दृष्टा
न्तः रुद्ररोचनं रजतं यस्याग्नौ दीनं तद्रुद्रस्य रुद्रवेयदव ग्रीयत तद्रजतं हिरण्यमभवदिति श्रुतेः तथ यथाग्नेः सवर्णो
न्मेलं जहाति स्ववर्णं भजते न न तत्तालनादिभिः तथा न यज्ञादिभिर्मलत्यागः किन्तु तस्य वसैव तेषां तत्सेवागव

जनो बुधोयं निजकर्मबन्धनः सुखेच्छया कर्म समीहते सुखे यत्सेवया तां विधुनोति असन्मतिं
ग्रन्थिं स भिन्द्याद्धृदयं स नो गुरुः ४७ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्त
मः भजेत वर्णं निजमेव सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ४८ न यत्प्रसादायुतभागलेशम
न्ये च देवा गुरवो जनाः स्वयं कर्तुं समेताः प्रभवन्ति पुंसः तमीश्वरं त्वां शरणं प्रपद्ये ४९ अचक्षुरन्ध
स्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः त्वमर्कदृक्सर्वदृशां समीक्षणो वृतो गुरुर्नः
स्वगतिं बुभुत्सतां ५० जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः त्वं त्वव्ययं ज्ञान
ममोघमञ्जसा प्रपद्यते येन जनो निजं पदं ५१ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानम
भीष्टसिद्धिः तथापि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ५२

मेवेति भावः ४८ परमेश्वरत्वं परमगुरुत्वं च प्रपञ्चयन्नाह यत्प्रसादस्यायुतभागः तस्य लेशमात्रमपि अन्ये देवा
दयः सर्वे समेताः अपि स्वयं तं त्रिरपेक्षाः सन्तः कर्तुं न भवन्ति ४९ तदेव दृष्टान्तेन स्पष्टयन्नाह अचक्षुरिति अवि
दुषोऽपि जनस्याबुधो विद्वान् गुरुः त्वं तु अर्कवत्प्रकाशवत्त्वं न प्रवृत्तो न यस्य समः अर्कदृक् अतः सर्वदृशां सर्वेन्द्रियाणां
समीक्षणः प्रकाशकः अत एव स्वगतिं बोद्धुमिच्छद्भिर्नोऽस्माभिर्गुरुर्वृतोऽसि ५० किंच प्राकृतो गुरुरनर्थहेतुरेवेत्या
ह जन इति यादिशते उपदिशति असतीं मतिं अर्थकामादिरूपां तेन तमः संसारं ५१ ननु तर्हि सर्वोऽपि लोकः माम् एव किं नो

श्रीः
भा॰अ॰
टी॰
५२

तं त्वामिति प्रतिबोधनाय उपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदयि भगवान्ग्रंथीनहंकारादीन्स्वमोकः स्वरूपं वि
वृणु प्रकाशय ५३ नृपतिं प्रति पुराणसंहितां मत्स्यपुराणमशेषतः अब्रवीदित्यनुषंगः ५५ योयं हरेरवतारः

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय छिंध्यर्थदीपैर्भगवद्वचोभिर्ग्रंथीन्हृदिस्थान्विवृणुस्व
मोकः ५३ श्रीशुक उवाच इत्युक्तवंतं नृपतिं भगवानादिपूरुषः मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवी
त् ५४ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीं सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५५ अश्रौषी
दृषिभिः साकमात्मतत्त्वमसंशयम् नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ५६ अतीतप्रलयापा
येतुत्थिताय स वेधसे हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ५७ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः
विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ५८ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः संवा
दं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ५९ अवतारो हरेर्योयं कीर्तयेदन्वहं नरः संकल्पास्तस्य सिद्ध्यं
ति स याति परमां गतिं ६० प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमुपनीतं प्रत्युपादत्त हत्वा
दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि ६१ इति श्रीभागवतेऽ
ष्टमस्कंधे आदिमत्स्यावतारकथनं नाम चतुर्विंशतितमोध्यायः २४ संपूर्णमिति अष्टमस्कंधः

तं यः प्रकीर्तयेत् ६० अतीतपूर्वो यः प्रलयः तस्यापाये अवसाने सत्यव्रतानां सत्यव्रतस्य ऋषीणां च बहुत्वापेक्षा
नीतिवत् तल्लिंगसमवायाद्बहुवचनं जिह्ममीनं मायामीनं ६१ इति श्रीभावार्थदीपिकायामष्टमस्कंधे चतु
र्विंशोध्यायः २४ संपूर्णः अष्टमस्कंधः ८ ॥

५२

५२ अष्टमस्कंधपत्राणि